

अथमासस्तबकेमार्गशीर्षमासमाहात्म्यप्रारंभः


सूत-
संवाद-
शौनकादि
ब्रह्मा-
विष्णु
भरद्वाज-
ऋषि-
वीरबाहु
राजा
देवशर्मा
ब्राह्मण-
शत्रु-
पक्षी-
मनोहर-
उपाध्या
भगवा
पूजकजन-
ब्राह्मण-
यजमा
स्त्री
रुक्ष्मा-
पुरुष
भागवतपाराय-

अथ मार्गशीर्षमाहात्म्यविषयानुक्रमणिका.

अ०	विषय.	अ०	विषय.	अ०	विषय.
१	ब्रह्मणाप्रश्नेश्रीविष्णुः मार्गशीर्षप्रशंसावर्णनपूर्वकगोपकन्याकृतव्रतनिरूपणं श्लो० २३		स्थनीर्योदकेनमार्जनादिकरणेफलंचाह. श्लोकाः ३६		नकथनं श्लोकाः ८८
२	स्नानविधिः वर्णापरत्वेपुंड्रधारणनिर्णयः ब्राह्मणादीनां द्वादशादितिलकधारणे अंगनिर्देशाः प्रत्येकांगेषुदेवतानिर्देशकथनं पुंड्रलक्षणं श्लोकाः ३८	६	पंचामृतमाहात्म्यंघृतापूजनविधानंतत्फलंचाह ततः चंदनमाहात्म्यं श्लो० ४४	१२	देवशर्माशूद्रंप्रतिएकादशीव्रतविधानंअखंडैकादशीलक्षणंतथैकादशीव्रतोद्यापनंचाह. श्लोकाः६७
३	पुंड्रभेदनिरूपकंब्रह्माणंप्रतिविष्णुः गोपीचंदनमाहात्म्यवर्णनपूर्वकशंखचक्रपद्मादिधारणनिर्णयंशंखादिधारणेमहाफलप्राप्तिंचाह. श्लोकाः ६७	७	विष्णुपूजनेयोग्यायोग्यपुष्पाणिप्रत्येकपुष्पाणांउत्तरोत्तरं पुण्याधिक्यवर्णनं श्लो० २९	१३	जागरणलक्षणंतन्माहात्म्यंमत्स्योत्सवनिरूपणंचाह श्लोक १०२
४	पद्माक्षधात्रीतुलसीमालाधारणमाहात्म्यंततोपूजाविधानंचाह श्लो. ४९	८	तुलसीमाहात्म्यंधूपदीपमाहात्म्यंनीराजनमाहात्म्यंचाह श्लो० ५१	१४	विष्णुरूपीब्राह्मणदंपत्यपूजनप्रतिपादनपूर्वंकंकृष्णनामस्मरणमाहात्म्यं श्लो० ६६
५	ततःपंचमेध्यायेक्षीरस्नानमाहात्म्यंपंचामृतस्नानमाहात्म्यंशंखोदकस्नानमाहात्म्यंशंख	९	नैवेद्यभेदनिरूपणं श्लोकाः ३३	१५	श्रीकृष्णस्यध्यानवर्णनपूर्वकंश्रीमद्भागवतश्रवणमाहात्म्यप्रतिपादनं श्लो० ५९
		१०	नैवेद्यानंतरकर्मनिरूपणंततोजपलक्षणंततोप्रदक्षिणानिर्णयंततोदामोदरंमंत्रारा धनंततः प्रणामादि लक्षणंचाह श्लो. ४५	१६	मार्गशीर्षमासेमथुरावासमाहात्म्यंतथा तस्मिन्नेवमासेपुष्करवासमाहात्म्यंचाह श्लो० ६
		११	एकादशीव्रतमाहात्म्यदशमीवेधत्यागःवीरबाहुभरद्वाजसंवादेन नृपस्यपूर्वजन्मवृत्तां		इतिमार्गशीर्षमाहात्म्यविषयानुक्रमणिकासमाप्ता.

श्रीगणेशायनमः देवकीनंदनंकृष्णंजगदानंदकारकम् भुक्तिमुक्तिप्रदंदेवंमाधवंभक्तवत्सलम् १ सूतउवाच श्वेतद्वीपेस्करवासीनंदेवदेवंरमापतिम् चतुर्वक्त्रोनमस्कृत्यपप्रच्छपितरंतदा २ ब्रह्मोवाच हृषीकेशजगद्धातःपुरुषश्रवणकीर्तन पृष्टंयद्वृहिदेवेशसर्वज्ञसकलेश्वर ३ मासानांमार्गशीर्षोहमित्युक्तंभवतापुरा तस्यमासस्यमाहात्म्यंज्ञातुमिच्छामितत्वतः ४ कोदेवस्तस्यकिंदानंकथंस्नानंविधीयते पुरुषैश्चात्रकिंकार्यंकर्तव्यंकिंरमापते ५ वक्तव्यंकिंतथापूजाध्यानमंत्रादिकंचयत् तत्रयत्क्रियतेकर्मतत्सर्वंब्रूहिमेच्युत ६ श्रीभगवानुवाच साधुपृष्टंमहाभागसर्वलोकोपकारिणा यस्मिन्कृतेकृतंसर्वमिष्टापूर्तादिकंचयत् ७ सर्वयज्ञेषुयत्पुण्यंसर्वतीर्थेषुयत्फलम् तत्फलंसमवाप्नोतिमार्गशीर्षेकृतेसकृत ८ तुलापुरुषदानाद्यैर्यत्फलंलभतेनरः तत्फलंप्राप्यतेपुत्रमाहात्म्यश्रवणेनकेल ९ यज्ञाध्ययनदानाद्यैःसर्वतीर्थावगाहनैः सन्यासेनचयोगेननाहंवश्योऽभवंनृणाम् १० स्नानेनदानेनचपूजनेनध्यानेनमौनेनजपादिभिश्च वश्योऽथवामार्गशिरेचमासितथानचान्येषुचगुह्यमुक्तम् ११ अन्यैर्धर्मादिभिःकृत्वागोपितंमार्गशीर्षकम् मत्प्राप्तेःकारणंमत्वादेवैःस्वर्गनिवासिभिः १२ येकेचित्सुण्यकर्माणोममभक्तिपरायणाः एभिरवश्यंकर्तव्योमार्गशीर्षोमदापनः १३ मार्गशीर्षंनकुर्वंतियेनराभारताजिरे पापरूपाश्चतेज्ञेयाःकलिकालविमोहिताः १४ अष्टस्वपिचमासेषुयत्फलंलभतेनरः तत्फलंप्राप्यतेवत्समाघेमकरगेरवौ १५ माघाच्छतगुणंपुण्यंवैशाखेमासिलभ्यते तस्माच्छतगुणंपुण्यंतुलासंस्थेदिवाकरे १६ तस्मात्कोटिगुणंपुण्यंवृश्चिकस्थेदिवाकरे मार्गशीर्षोधिकस्तस्मात्सर्वदाचममप्रियः १७ उषस्युत्थायययोमर्त्यः स्नानंविधिवदाचरेत् तुष्टोऽहंतस्ययच्छामि आत्मानमपिपुत्रक १८ अत्राप्युदाहरंतीदंशृणुपुत्रकथांतरम् नंदगोपोमहात्मावैरव्यातोयोभूतलेऽभवत् १९

टीप १ बहिर्भूतसाधनरूपंकर्मकिंकार्यं २ आत्मसाधनभूतंकर्मकिंकर्तव्यम्.

यत्रवृंदावनेरम्येगोपकन्याःसहस्रशः नासांचित्तंचमद्रूपेलग्नमासीत्पुरोऽनघ २० नासांबुद्धिर्मयादत्तामार्गसी
र्षावगाहने ततस्ताभिःकृतंस्नानप्रातःकालेयथाविधि २१ पूजाकृताहविष्यान्नभुक्ताभिःकृतानतिः एवंकृतेन-
विधिनाप्रसन्नोऽहंननोनघ २२ वरोदत्तोमयात्मावैनासांतुष्टोऽभवैकिल तस्मान्नरैस्त्रकर्तव्योमार्गशीर्षोयथाविधि
२३ इतिश्रीस्कंदपुराणेब्रह्मविष्णुसंवादेमार्गशीर्षमाहात्म्येप्रथमोऽध्यायः १ ऋ ब्रह्मोवाच त्वयो
क्तोविधिसंयुक्तोमार्गशीर्षोमदापनः कोविधिस्तस्यदेवेशसर्वमेब्रूहिकेशव १ श्रीभगवानुवाच रात्रावंतेसमुत्था
यउपस्पृश्ययथाविधि नमस्कृत्वागुरुंस्वीयंसस्मरन्नामनंदितः २ सहस्रनामभिस्तुत्वाकीर्तयेद्वाग्यतःशुचिः बहि
र्ग्रामात्समुत्सृज्यमलमूत्रंयथाविधिः ३ शौचंकृत्वायथान्यायमाचम्यप्रयतःशुचिः दंतधावनपूर्वंचस्नानंकृत्वाय-
थाविधि ४ आदायतुलसीमूलमृदंतत्पत्रसंयुताम् मूलमंत्रेणाभिमंत्र्यगायत्र्यावामहामते ५ मंत्रेणैवानुलिप्ता-
गःस्नायादद्याघमर्षणम् अनुधृतैरुधृतैर्वाजलैःस्नानंविधीयते ६ तीर्थमकल्पयेद्विद्वान्मंत्रेणानेनमंत्रवित् ॐ
नमोनारायणायेतिमूलमंत्रउदाहृतः ७ दर्भपाणिस्तुविधिनाऽऽचांतःपुरतःशुचिः चतुर्हस्तं समायुक्तंचतुरस्रंस-
मंततः ८ प्रकल्प्यावाहयेद्गंगामेभिर्मंत्रैर्विचक्षणः विष्णुपादप्रसूतासिवैष्णवीविष्णुदेवता ९ त्राहिनस्त्वानमस्त-
स्मादाजन्ममरणांतिकम् तिस्रःकोट्यार्धकोटीचतीर्थानांवायुरब्रवीत् १० दिविभुव्यंतरिक्षेचतानितेसंतिजाह्नवी
नंदिनीत्येवतेनाम्देवेषुनलिनीतिच ११ दक्षपुत्रीचविहगाविश्वगायोगिनांमता विद्याधरास्कप्रसन्नातथालोकप्र
साधिनी १२ क्षेमाचजाह्नवीचैवशांताशांतिप्रदायिनी एतानिपुण्यनामानिस्नानकालेसदापठेत् १३ सदासन्नि
हितातत्रगंगागच्छिपथगामिनी सप्तधाराभिजप्तेनकरसंपुटयोजितम् १४ मूर्ध्नाकृताजलिर्भूयस्त्रिचतुःपंचसप्तवा स्ना
नंकुर्यान्मृदानद्भदामंत्र्यानुविधाननः १५ अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतं

१६ उद्धृतासिवराहेणकृष्णेनशतबाहुना नमस्तेसर्वभूतानांप्रभवारणिसंज्ञते १७ एवंस्नात्वाततःपश्चादाचम्यच
विधानतः उत्थायवाससीशुक्लेकूलेवैपरिधायच १८ आचम्यतर्पयेद्देवान्पितॄंश्चैवऋषींस्तथा निष्पीड्यवस्त्रमाच
म्यधौतवस्त्रोऽविचेष्टितः १९ विमलांमृत्तिकांरम्यामादायद्विजसत्तम मंत्रेणैवाभिमंत्र्याथललाटादिषुवैष्णवः २०
धारयेदूर्ध्वपुंड्राणियथासंख्यमनंद्रितः ब्रह्मन्द्वादशपुंड्राणिब्राह्मणःसततंवहेत् २१ चत्वारिभूभृतांपुत्रपुंड्रा-
णिद्वेविशांस्मरेत् एकपुंड्रंस्त्रीणांशूद्राणांचविधीयते २२ ललाटउदरेचैववक्षोबाहुकंठकूबरे कुक्षौबाह्वोःकर्ण
योश्चपृष्ठेत्रिकेचवैशिरः २३ तिलकाद्वादशप्रोक्ताब्राह्मणस्यसदानघ ललाटेदक्षिणेबाह्वोश्चक्षात्रःपुंड्राणिधारयेत्
२४ ललाटेहृदयेवैश्योभालेवैशूद्रयोषिताम् ललाटेकेशवंध्यायेनारायणमथोदरे २५ वक्षस्थलेमाधवंच्च
गोविंदंकंठकूबरे विष्णुंचदक्षिणेकुक्षौबाह्वोश्चमधुसूदनम् २६ त्रिविक्रमंकर्णरंध्रेवामनंवामपार्श्वके श्रीधरंवा
मबाहौचहृषीकेशंचकर्णके २७ पृष्टेतुपद्मनाभःस्यात्त्रिकेदामोदरंन्यसेत् तत्प्रक्षालनतोयेनवासुदेवंतुमूर्धनि
२८ एवंकार्यंब्राह्मणस्यक्षत्रियस्योपधारयेत् ललाटेकेशवंध्यायेद्धृदयेमाधवंतथा २९ बाह्वोश्चउभयोर्वक्षस्स्म
रेद्वैमधुसूदनम् क्षत्रियस्यविधिःप्रोक्तोवैश्यकृत्यंनिशामय ३० ललाटेकेशवंध्यायेद्धृदयेमाधवंतथा योषिच्छू
द्रोस्मरेद्वैकेशवंभालदेशके ३१ अनेनविधिनाकुर्यात्पुंड्राणिममतुष्टये श्यामशांतिकरंप्रोक्तंरक्तंवश्यकरंतथा ३२
श्रीकरंपीतमित्याहुःश्वेतंमोक्षकरंशुभम् एकांतिनोमहाभागाः सर्वलोकहितेरताः ३३ सांतरालप्रकुर्वंतिपुंड्रंहरि-
पदाकृतिम् मध्येच्छिद्रेणसंयुक्तमेतद्धरिमंदिरम् ३४ ऊर्ध्वसौम्यमृजुसौक्ष्म्यंसुपार्श्वसुमनोहरम् निरंत

टीप– १ कूलेइत्यत्र नद्यांतदागेवास्नानंचेत्तदा तटे गृहेयदिस्नानं तदास्नानभूमिसकाशाद्वहिस्थले २ पृष्ठवंशाधरे त्रिकमित्य
मरः त्रिभिरस्थिभिर्घटितेस्थानेः

गलंयः कुर्यादूर्ध्वपुंड्रंद्विजाधमः ३५ सहितन्त्रस्थितंलक्ष्म्यासहमांचव्ययोहरि अच्छिद्रमूर्ध्वपुंड्रंतुयेकुर्वंतिद्विजा-
धमाः ३६ तैर्ललाटशनःपादनिक्षिप्तंवेनसंशयः तस्मिंश्छिद्रान्वितंपुंड्रंमहाच्छिद्रंशुभान्वितम् ३७ धारयेद्ब्राह्मणो-
नित्यंहरिसालोक्यसिद्धये ३८ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येद्वितीयोऽध्यायः २ ७ ७
ब्रह्मोवाच पुंड्रंकतिविधंकार्यंब्रूहिममकेशव पुंड्राणांश्रवणेऽतीवकौतुकममजायते १ श्रीभगवानुवाच
शृणुपुत्रप्रवक्ष्यामिपुंड्रंचविविधंस्मृतम् तुलसीमृत्तिकयासार्द्धंगोपीचंदनमेवच २ हरिचंदनतःकार्यंपुंड्रंतत्रविचक्ष-
णैः गोपीचंदनमाहात्म्यंनिबोधगदतोममं ३ श्रीरुष्णतुलसीमूलमृदमादायभक्तिमान् धारयेदूर्ध्वपुंड्राणिहरि-
स्तत्रप्रसीदति ४ योमृत्तिकांद्वारवतीसमुद्भवांकरेसमादायललाटपट्टे करोतिनित्यंपुरुषोर्ध्वपुंड्रंक्रियाफलंकोटि
गुणंतदाभवेत् ५ क्रियाविहीनंयदिकर्महीनंश्रद्धाविहीनंयदिकालवर्जितम् कृत्वाललाटेयदिगोपिचंदनंप्राप्नोतिनत्क
र्मफलंसदाध्रुवम् ६ गोपीचंदनसंभवंरुरुचिरंकृत्वाललाटेद्विजोनित्यंधारयतेयदिप्रतिदिनरात्रौदिवासर्वदा यस्यु
ष्यंकुरुजांगलेरविग्रहेमाघेप्रयागेनयातत्प्राप्नोतिततोधिकंममगृहेसंतिष्ठतेदेववत् ७ यस्मिन्गृहेतिष्ठतिगोपिचंदन
भक्त्याललाटेमनुजोबिभर्तिचेत् तस्मिन्गृहेऽहंनिवसामिसर्वदाश्रियान्वितःकंसनिहाचतुर्भुव ८ योधारयेद्वार
वतीसमुद्भवंपुण्यंपवित्रंकलिकल्मषापहम् नित्यंललाटेममंत्रयुक्तंयमनपश्यत्यपिपापसंयुतम् ९ यस्यातुका
लेसतुगोपिचंदनंबाह्वोर्ललाटेहृदिमस्तकेच प्रयातिलोकेकमलापतेर्ममगोबालघातीयदिब्रह्महास्यात् १० ग्रहा
नपीडंतिनरक्षसांगणायक्षःपिशाचोरगभूतनायकाः ललाटपट्टेकृतगोपिचंदनंसंतिष्ठतेयस्यममप्रभावात् ११ ऊर्ध्व
पुंड्रंऋजुसोम्यंललाटेयस्यदीप्यते सचांडालोपिशुद्धात्मापूज्यएवनसंशयः १२ अशुचिर्वाप्यनाचारोमहापापसमा-
चरेत् अस्नातोयःक्रियाःकुर्यादशुचिःपापसंयुतः १३ गोपीचंदनसंपर्कात्पूज्यएवनसंशयः अशुचिर्वाप्यनाचारो

महापापंसमाचरेत् १४ शंखचिरेवभवेन्नित्यमूर्ध्वपुंड्रांकितोनरः मल्प्रियार्थंशंखभार्थेवारक्षार्थंचतुरानन १५ मत्पूजा
होमकेचैवसायंप्रातःसमाहितः मद्भक्तोधारयेन्नित्यमूर्ध्वपुंड्रंभवापहम् १६ ऊर्ध्वपुंड्रधरोमर्त्योगृहेयस्यान्नमश्नुते
तद्विशत्कुलंतस्यनरकादुद्धराम्यहम् १७ वीक्ष्यादर्शतलेवापियोविदध्यात्मयत्नतः ऊर्ध्वपुंड्रंमहाभागसयातिपर
मांगतिम् १८ अनामिकाशांतिदोक्तामध्यमायुःकरीभवेत् अंगुष्ठःपुष्टिदःप्रोक्तस्तर्जनीमोक्षदायिनी १९ गो
पीचंदनखंडंतुयोददातिचवैष्णवे कुलमष्टोत्तरंतेनपावितंवैभवेच्छत २० यज्ञोदानंतपोहोमःस्वाध्यायःपितृत
र्पणम् व्यर्थंभवतितत्सर्वमूर्ध्वपुंड्रंविनाकृतम् २१ यच्छरीरंमनुष्याणामूर्ध्वपुंड्रंविनाकृतम् तन्मुखंनैवपश्यामिस्मशा
नसदृशंहितत् २२ ऊर्ध्वपुंड्रंतुयःकुर्यान्मत्स्यकूर्मादिधारणम् कुर्याद्विष्णुःप्रसादार्थंमहाविष्णोरतिप्रियम् २३ य
त्पुनःकलिकालेतुमत्पुरीसंभवांमृदम् मत्स्यकूर्मांकितंचिन्हंगृहीत्वाकुरुतेनरः २४ देहेतस्यप्रस्थितंमांजानीहिश्रिद-
शापमम् तस्यमनातरंकिंचित्कर्तव्यंश्रेयमिच्छता २५ ममावतारचिन्हानिदृश्यंतेयस्यविग्रहे मर्त्योमर्त्यानविज्ञेयःस
नूनंमामकीतनुः २६ पापंकरुतरूपंतुजायतेतस्यदेहिनः ममायुधानिदृश्यंतेलिखितानिकलौयुगे २७ उभाभ्या-
मपिचिन्हाभ्यांयोंकितोमत्स्यमुद्रया कूर्मयापिस्वयंतेजोधिक्षिप्तंतस्यविग्रहे २८ शंखंचपद्मंचयथास्यांगंमत्स्यं
चकूर्मरचितंस्वदेहे करोतिनित्यंकृतस्यदृष्टिंपापक्षयंजन्मशतार्जितस्य २९ नारायणायुधैर्नित्यंचिन्हितोयस्यवि-
ग्रहः पापकोटिप्रयुक्तस्यतस्यकिकुरुतेयमः ३० शंखोद्धारेचयत्प्रोक्तंवसतांकोटिजन्मभिः तत्फलंलभतेशंखेप्र-
त्यहंदक्षिणेभुजे ३१ यत्फलंपुष्करेप्रोक्तंपुंडरीकाक्षदर्शनात् शंखोपरिकृतेपद्मेतत्फलंकोटिसंमितम् ३२ वामेभुजे
गदायस्यलिखितादृश्यतेकलौ गदाधरोगयापुण्यंप्रत्यहंतस्ययच्छति ३३ यच्चानंदपुरेप्रोक्तंचक्रस्वामीसमीपतः
गदाचक्रेचलिखितेतत्फललिंगदर्शने ३४ मयायुधांकितंदेहंगोपीचंदनमृत्तया प्रयागादिषुतीर्थेषुसंगत्वाकिंक

रिष्यति ३५ यदायदाप्रपश्येतदेहंशंखादिचिह्नितम् तदातदाप्रपन्नोहंपापंनस्यदहामिवै ३६ तिष्ठतेय-
स्यदेहेतुभ्रह्मोरात्रंदिनेदिने शंखचक्रगदापद्मलिखितंस मदात्मकः ३७ नारायणायुधैर्युक्तंकृत्वात्मानंकलौ
युगे पुण्यंकर्मप्रकुरुतेमेरुतुल्यंनसंशयः ३८ शंखायुधांकितोभक्त्यायःश्राद्धंकुरुतेनर विधिहीनंतुसंपूर्णं
पितृणांदत्तमक्षय ३९ यथाग्निर्दहतेकाष्ठंवायुनाप्रेषितोभृशम् तथादहत्यतिपापानिदृष्ट्वामेश्रायुधानिवै ४०
ममायुधांकितामुद्राश्चष्टाक्षरसमन्विताम् शंखादित्स्वायुधैर्युक्तांस्वर्णरौप्यमयामपि ४१ धत्तेभागवतोयस्तुक
लिकालेविशेषतः प्रह्लादस्यसमोज्ञेयोनान्यथाममवल्लभः ४२ यस्यनारायणीमुद्रादेहंशंखादिचिह्नितं धात्री-
फलैः कृतामालातुलसीकाष्ठसंभवा ४३ द्वादशाक्षरमंत्रैस्तुनित्युक्तानिकलेवरे श्रायुधानिचविप्रस्यमत्समःस
चचेष्णवः ४४ शंखांकितननुर्विप्रोभुंक्तेयस्यगृहेमनि नदत्रक्षयमश्नामिपितृभिःसहपुत्रक ४५ कृष्णायुधा
कितंदृष्ट्वासन्मानंनकरोतियः द्वादशाब्दार्जितंपुण्यंबाष्कलेयायगच्छति ४६ कृष्णायुधांकितोयस्तुश्मशानेग्नी
यतेयदि प्रयागेयागतिः प्रोक्तासागतिस्तस्यमानद ४७ ममायुधैः कलौनित्यमंडितोयस्यविग्रहः तन्नाश्नमंगकु
र्वंतिविबुधावासवादयः ४८ यः करोतिचमेपूजांममशस्त्रांकितोनरः श्रपराधसहस्राणिपापंतस्यहराम्य-
हम् ४९ कृत्वाकाष्ठमयंबिंबंममशस्त्रैःसुचिह्नितम् योवैश्रंकयतेदेहंतत्समोनास्तिवैष्णवः ५० श्रष्टाक्ष
रांकितामुद्रायस्यधातुमयीकरे शंखपद्मादिभिर्युक्तापूज्यतेसौकरास्करैः ५१ धृतानारायणीमुद्राप्रह्लादेनपु
राकरे बिभीषणेनबलिनाध्रुवेणचशुकेनच ५२ मांधात्रात्यंबरीषेणमार्कंडेयमुरुर्वाह्वजैः शंखादिचिह्नितैः शा
स्त्रैर्दहकृत्याचमानद ५३ एवमाराध्यमाप्राप्तसमीहितफलंमहत् गोपीचंदनमृत्स्नायालिखितोयस्यविग्रहः
५४ शंखचक्रादिपद्माकेदेहेतस्यवसाम्यहम् सौवर्णेरजतेताम्रकास्यमायसमेवच ५५ एवंरूपदर्शनचक्र

कार्यौनविचक्षणैः उपवीतादिवद्धार्याः शंखचक्रगदाःसदा ५६ ब्राह्मणैःक्षत्रियैर्वैश्यैर्वैष्णवैश्चविशेषतः उपवीतशिखायद्दृच्चक्रलांछनसंयुतम् ५७ चक्रलांछनहीनस्यविप्रस्यविफलंभवेत् ममचक्रांकितंदेहंपवित्रइति वैश्रुतिः ५८ चक्रांकितायदातव्यंहव्यंकव्यंविचक्षणैः ममचक्रांककवचमभेद्यंदेवदानवैः ५९ अजेयः सर्वभूतानांशस्त्रैरक्षसामपि ममचक्रांककवचंशरीरेयस्यतिष्ठति ६० नाशुभंविद्यतेतस्यगृहेपुत्रादिकस्यहि दक्षिणेचभुजेविप्रोबिभृयाद्देवदर्शनम् ६१ सव्येचशंखंबिभृयादितिवेदविदोविदुः तत्तन्मंत्रेणमंत्रज्ञःप्रतिष्ठाप्यपृथक्पृथक् ६२ ललाटेचगदाधार्यामूर्ध्निचापिशरस्तथा नंदकंचैवदेहमध्येशंखचक्रंभुजद्वयम् ६३ तस्मात्सर्वप्रयत्नेनचक्रादीन्धारयेत्सदा धारणानंतरंब्रूयात्तत्रचैवद्विजोत्तम ६४ पुत्रामित्रकलत्रादियःकश्चिन्मत्परिग्रहः सहदेहेनसर्वोसौविप्रप्रीत्यैतथार्पितः ६५ पश्चात्स्वधर्ममास्थायनिष्ठदाजीवनंमम भक्त्याचाव्यभिचारिण्यासर्वदात्मनोरथः ६६ शंखचक्रांकितंदृष्ट्वायेनिंदंतिनराधमाः अवलोक्यमुखंतेषामादित्यमवलोकयेत् ६७ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येतृतीयोऽध्यायः ३ ४ ब्रह्मोवाच नवचक्रांकितंदृष्ट्वात्मानमथदीक्षितः पद्माक्षतुलसीमालाफलंब्रूहिकेशव १ श्रीभगवानुवाच तुलसीकाष्ठसंभूतायोमालांवहतेद्विजः अप्यशौचोप्यनाचारोमामेवैतिनसंशयः २ धात्रीफलकृतामालातुलसीकाष्ठसंभवा दृश्यतेयस्यहेतुसवैभागवतोनरः ३ तुलसीदलजामालाकंठस्थांवहतेतुयः पत्रेपत्रेश्वमेधानादशानांलभतेफलम् ४ तुलसीकाष्ठसंभूतांयोमालांवहतेनरः फलंयच्छाम्यहंवत्सप्रत्यहंद्वारकोद्भवम् ५ निवेद्यभक्त्यामांमालांतुलसीकाष्ठसंभवाम् वहतेयोनरोभक्त्यानास्त्यनास्तीतिपानकृम् ६ सदाप्रीतमनास्तस्यश्चहंप्राणवरोहिसः तुलसीकाष्ठसंभूतंशिरसःकाष्ठभूषणम् ७ बाह्वोःकरेचमर्त्यस्यदेहेयस्यसमोप्रियः तुलसीकाष्ठमालाभिर्भू-

षितः पुण्यमाचरेत् ८ पितॄणांदेवतानांचपुण्यंकोटिगुणंभवेत् तुलसीकाष्ठमालांतुधेत्राजस्यदूतकाः ९
दृष्ट्वानश्यंतिदूरेणवानोद्भूतंयथादलम् यद्बृहेतुलसीकाष्ठपत्रंशुष्कमथार्द्रकम् १० तद्बृहेतुभवेन्नैवपापंवै-
संगतेकलौ तुलसीकाष्ठमालाभिर्भूषितोभ्रमतेभुवि ११ दुःस्वप्नंदुर्निमित्तंचनभयंशस्त्रजंक्वचित् धारयंति
नयेमालांकोनुकात्सापबुद्धयः १२ नरकान्निवर्ततेदग्धाःकोपाग्निनामम तस्माद्धार्यामयत्नेनमालातुलसि-
संभवा १३ पद्माक्षनिर्मितामर्त्यःफलैर्धार्याःसपुण्यदा तदूर्ध्वंपुंड्रशास्त्रवाद्यैर्युक्तस्तुलसिभूषणैः १४ स
ध्योपास्यादिकंकुर्यात्कुशपाणिर्हिमास्मरन् कृतसंध्यादिकोभक्तस्तनःसंपूजयेच्चमाम् १५ गुरुश्चेत्तत्रवर्ते
तच्चादौगत्वानमेद्गुरुम् किंचिद्दत्वोपायनंचदंडवत्प्रणमेन्मुदा १६ आचम्यैकाग्रमनसापूजामंडपमाविशेत् उ-
पविश्यासनेरम्ये कृष्णाजिनकुशोत्तरे १७ सम्यक्पद्मासनासीनोभूतशुद्धिंसमाचरेत् प्राणायामत्रयंकृत्वा
मंत्रेणचजितेंद्रियः १८ उद्दंडमुरुवस्तनःकृत्वात्मत्पंकजमनुत्तमम् विकाशितस्यकुर्वीतविज्ञानरविणाभुवि
१९ तत्कर्णिकायांवक्ष्यामःशोषाबीजान्यनुक्रमात् यंत्रयात्मकंसर्वंचिंतयेद्धेष्णावानरः२०नानारत्नमयंपीठंतेषा
मुपरिविन्यसेत् तस्मिन्मृदुस्तल्पनरंबालार्कसदृशद्युतिम् २१ अष्टैश्वर्यदलपद्मंशंखचक्रगदाधरम् पद्म
पत्रविशालाक्षंसर्वलक्षणलक्षितम् २२ श्रीवत्सकौस्तुभोरस्कंपीतवस्त्रान्वितत्वचम् विचित्राभरणैर्युक्तंदिव्य-
मंडनमंडितम् २३ दिव्यचंदनलिप्तांगंदिव्यपुष्पोपशोभितम् कोटिबालार्कसदृशंकांतंदिव्यश्रियासह २४
सर्वलक्षणलक्षिण्यासमाश्लिष्टतनुंशिवम् एवंध्यात्वाजपेन्मंत्रंसमाहितमनाःशुचिः २५ सहस्रंशतवारंवाथ-
थाशक्तिजपेन्मंत्रम् मनसैवार्चनंकृत्वातन्नोविधिवदाचरेत् २६ संप्रदायानुरोधेनशरंस्थाप्यमथाग्रतः दूर्वांकु
रैश्चपुष्पैश्चगंधोदेनचपूरितम् २७ दक्षिणेगंधपुष्पाणांपात्रस्थाप्यंचदेशिकैः वामभागेन्यसेत्कुंभंरत्नपूतंसु

वासितम् २८ पुरतोममघंटांचदिक्षुदीपान्नियोजयेत् अन्यत्सर्वंसाधनंचयथास्थानेचविन्यसेत् २९ अर्घ्य पाद्याचमनीयमधुपर्कस्यकारणात् विन्यसेत्पुरतोमत्र्यचत्वारिपात्रकाणिवै ३० सिद्धार्थाक्षतपुष्पाणिकुशाग्रं तिलचंदनम् फलंयवाश्चनुर्वल्कअर्घ्यपात्रेविनिक्षिपेत् ३१ दूर्वाविष्णुपणीत्यामापद्मचैवचतुर्मुख पाद्य पात्रेन्यसेत्सुत्रदेशिकोममतुष्टये ३२ कंकोलंचलवंगंचफलमार्त्तीसंभवम् कुर्याद्वैश्रद्धयाश्रेयान्यात्रेआचा मनीयके ३३ गव्यपयोदधिमधुघृतखंडसमन्वितम् मधुपर्कस्यपात्रेवैदद्याद्वैश्रद्धयाचकः ३४ उक्तानाद्रव्य जातीनामलाभेपत्रपुष्पयोः ननद्भावनयाकुर्यात्सर्वदाविधिकोविदैः ३५ करन्यासंततःकुर्यादंगन्यासंतथैवच पंचांगंवाषडंगंवाविन्यसेत्सप्रदायतः ३६ ममानुस्मरणकार्यमात्मानमनिशंस्मरेत् पूजारंभेचतुर्वल्कमंगलंतु पठेन्नरः ३७ अथसंपूजयेच्छंखंपांचजन्यंममप्रियम् यस्यसंपूजनाद्वत्सन्यानंदःपरमोमम ३८ शंखस्य पूजनेवत्समंत्रानेनानुदीरयेत् त्वंपुरासागरोत्पन्नोविष्णुनाविधृतःकरे ३९ निर्मितःसर्वदेवैश्चपांचजन्यनमो स्तुते तवनादेनजीमूनाविघ्नसंनिस्करास्करा: ४० शशांकायुतदीप्ताभपांचजन्यनमोस्कते गर्भादेवारिनारीणां विलीयंतेसहस्त्रधा ४१ तवनादेनपातालेपांचजन्यनमोस्कते दर्शनेनैवशंखस्यकिंपुनःस्पर्शनेकृतम् ४२ विलयंयांतिपापानिहिमवद्भास्करोदये नत्वाशंखंकरेधृत्वामंत्रैरेभिस्कवैष्णवः ४३ यःस्नापयतिमांभ॰ स्त्यानस्यपुण्यमनंतकम् स्कवासितेनतैलेनकुर्यादभ्यंजनंततः ४४ कस्तूर्याचंदनेनैवकुर्यादुद्वर्तनादिकम् सुगंधादिसितैस्तोयैःस्नाप्यमंत्रयुतैः शुभैः ४५ अर्घ्यंदत्वाततोमंत्रपाद्यमाचमनीयकम् मधुपर्कंततोद॰ द्यात्पायसापूपमिश्रितम् ४६ सकर्पूरतांबूलंचभक्त्याचैवनिवेदयेत् सुरभीणिचपुष्पाणि भक्त्यासम्यक्निवेदयेत् ४७ धूपदशांगमष्टांगदीपंचैकमनोहरम् परिणीयप्रणम्याथस्तुत्वास्तुतिभिरादरात् ४८ शास्त्रयि॰

त्वानुपर्येकेमंगलार्घ्यंनिवेदयेत् ४९ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येचतुर्थोध्यायः ४ ५
ब्रह्मोवाच पंचामृतस्यस्नपनाद्यत्फललभतेहरेः शंखोदकेनयत्किंचित्तन्मेब्रूत्यजिताच्युत १ श्रीभगवानुवाच क्षीरस्नानंप्रकुर्वंतियेनरामंममूर्द्धनि शताश्वमेधजंपुण्यंबिंदुनाबिंदुनासमम् २ क्षीराद्दशगुणंपुण्यं घृतेनैवदशोत्तरम् गंधपुष्पोदकंमंत्रसर्वोत्कृष्टंप्रशस्यते ३ द्वादश्यांपंचदश्यांवागव्येनपयसासमम् स्नापनेदेवशार्दूलमहापातकनाशनम् ४ दध्यादीनांविकाराणांक्षीरतःसंभवोयथा तथैवाशेषकामानां क्षीरेणस्नपनोमम ५ क्षीरस्नानेनसौभाग्यंदध्नामिष्टान्नभोजनम् घृतेनस्नापयेद्धीमानरोममपुरंव्रजेत् ६ स्नानंशर्करयायस्तुकार्यन्मार्गशीर्षके सराजाजायतेलोकेपुरस्वर्गादिहागतः ७ गजाश्वरथसंपूर्णंस राज्यंलभतेभुवि कारयेन्मार्गशीर्षेवैयः क्षीरस्नापनंमम ८ स्वर्गलोकंसजयतित्वद्रुद्रेंद्रमारुतान् क्षीर-
नपरश्रेष्ठमार्गशीर्षेचपुत्रक ९ क्षीरस्नपनमाहात्म्यंवर्चस्वपुष्टिवर्धनम् सौभाग्यंविलयंयातिक्षीरस्नाने
ेसकृत १० स्नापयेन्मार्गशीर्षेमायोवैपंचामृतेनतु सनशोच्योभवेज्जंतुर्बंधूनांभुविमानव ११ कपिलाक्षीरमा
दाययःस्नापयतिमासकृत कपिलाशतमानस्यफलंप्राप्नोतिमानवः १२ शंखतीर्थोदकंकृत्वायः स्नापयति
देशिकः बिंदुनापिसहोमासेस्वकुलंनारयेद्धरिः १३ कापिलंक्षीरमादायशंखेकृत्वाचमानद यःस्नापय-
तिमांभक्त्यासर्वतीर्थफलंलभेत् १४ शंखाष्टकेनयःस्नानंकारयेन्मार्गशीर्षके भक्त्याभागवनः श्रेष्ठोम
मलोकेमहीयते १५ शंखषोडशकेनाथयःस्नापयतिमेसकृत सपापमुक्तःसुचिरंस्वर्गलोकेमहीयते १६
चतुर्विंशतिसंख्याकैः शंखैर्यःस्नापयेन्नमाम् इंद्रलोकेचिरंस्थित्वासराजाभुविजायते १७ शंखाष्टोत्तरशते
नैवस्नापयेन्मार्गशीर्षके शंखेशंखेसुवर्णस्यफलंप्राप्नोतिमानवः १८ मार्गशीर्षभक्तिमान्यः शंखपद्मशते

र्हिमाम् स्नापयेत्पितरस्तस्यस्वर्गेनावत्यनिष्ठिताः १९ अष्टोत्तरसहस्रंतुशंखस्नानंनुयश्चरेत् सगणोमुक्तिमा
प्नोतियावदाभूतसंप्लवम् २० नित्यंसंस्नापयेद्योमांशंखेनसकरसत्तम गंगास्नानफलप्राप्यनित्यंनदतिदेववत्
न् २१ शंखेतोयंसमादायययःस्नापयतिमांसकृत नमोनारायणेत्युक्त्वामुच्यतेसर्वकिल्बिषैः २२ कृत्वापादो
दकंशंखेवैष्णवानामहात्मनाम् योददातिनिलोम्निअंचांद्रायणफलंलभेत् २३ नाद्यंतडागंजंवापिवापी
कूपादिकंचयत् गांगेयंजायतेसर्वंजलंशंखेकृतंचयत् २४ गृहीत्वाममपादाब्जंशंखेकृत्वातुवैष्णवः योवहे
च्छिरसानित्यंसमुक्तिंतपतांवरः २५ त्रैलोक्येयानितीर्थानिममचैवाज्ञयासकृत शंखेतानिवसंतीहतस्माच्छं
खोवरःस्मृतः २६ त्वंपुरासागरोत्पन्नःपादयोर्मेनवःस्मृताः साबुशंखंकरेधृत्वामंत्रेरेतैस्तुवैष्णवः २७ यःस्ना
पयतिमांशीर्षेतुष्टस्तस्यभवाम्यहम् नैषामुच्चारपूर्वंतुस्नापयेन्नामतद्विनः २८ तस्यपुण्यस्यसंख्यांवैकर्तुनैव
शक्नुयात्पुरतोममदेवेशसपुष्पःसजलाक्षतः २९ शंखस्त्वभ्यर्चितस्तिष्ठेत्स्वयंथीःसचतोसुरो विलंपनेन
संपूर्णंशंखंकृत्वानुमांभजेत् ३० तदामेपरमाप्रीतिर्भवेद्धैतस्यवार्षिकी शंखंकृत्वातुपानीयंसपुष्पंसजला
क्षतम् ३१ अर्घ्यंददातियोमांवैतस्यपुण्यमनंतकम् अर्घ्यंकृत्वास्वयंशंखंयःकरोतिप्रदक्षिणाम् ३२ प्र-
दक्षिणीकृतानेनसप्तद्वीपावसुंधरा भ्रामयित्वाचमूर्धिमंदिरंशंखवारिणा ३३ मोक्षयेद्दुष्कृतोयस्तुना
शंभवेद्धेभवेत् निदाघेनक्रमस्तस्यनारकंनभयंक्वचित् ३४ यस्यपादोदकंशंखेकृतंमूर्धानमालभेत् ग्रह-
रक्षांसिकूष्मांडापिशाचोरगदानवाः ३५ दृष्ट्वाशंखोदकंमूर्ध्निविद्रवंतिदिशोदश वादित्रनिनदैरुच्चैर्गीतवादि
त्रनिःस्वनैः यःस्नापयतिमांभक्त्याजीवन्मुक्तोभवेद्धिसः ३६ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येपंच-
मोऽध्यायः ५ ७ ब्रह्मोवाच घंटानादस्यमाहात्म्यंचंदनस्यतथाच्युत यत्फलंलभतेत्वामिस्तत्स-

र्वेब्रूहिनत्वतः १ श्रीभगवानुवाच स्नानार्चनक्रियाकालेघंटानादंकरोतियः पुरतोममदेवेशनस्यपुण्यफ
लंशृणु २ वर्षकोटिसहस्राणिवर्षकोटिशतानिच वसतेमामकेलोकेअप्सरोगणसेवितः ३ सर्ववाद्यमयीघंटा
सर्वदेवमयीयतः तस्मात्सर्वप्रयत्नेनघंटानादंतुकारयेत् ४ सर्ववाद्यमयीघंटासर्वदाममवल्लभा वादनाल्ल
भतेपुण्ययज्ञकोटिशतोद्भवम् ५ घंटानादःसदाकार्यःपूजाकालेविशेषतः मन्वंतरसहस्राणिमन्वंतरशतानिच
६ प्रीतोभवामिसततंघंटानादेनपुत्रक. भेरीशंखनिनादेनघंटानादान्वितेनच ७ मृदंगशंखेनयुतंपणवेनस-
मन्वितम् अर्चनंममदेवेशसततंमोक्षदंनृणाम् ८ यत्रतिष्ठतपुरतोघंटानादान्वितंमम अर्चितावैष्णवैर्यत्न
त्रमांविद्धिपुत्रक ९ वैनतेयांकितांघंटांपश्यतेयाथवा ममाग्रेस्थापयेद्यस्ततस्यपापंहराम्यहम् १० मदी-
यार्चनवेलायांघंटानादंकरोतियः नश्यंतिनस्यपापानिशतजन्मार्जितान्यपि ११ स्थापकालेप्रकुर्वंतिघंटानादंच
भक्तितः ममैवार्चनवेलायांफलंकोटिगुणोद्भवम् १२ येमामर्चंतिदेवेशंस्कंधपर्णोपरिसंस्थितम् शंखचक्रगदा-
युक्तंसचक्रंचश्रियायुतम् १३ किंक्रियंतिनतेनीर्थैर्देवतानांचदर्शनैः किंयज्ञैःकिंव्रतैर्वापिकिंदानैःकिमुपोषणैः
१४ मूर्तिर्नारायणीयत्रमामकीगरुडोपरि स्थापयित्वाकलौयांतिकल्पकोटिपदंमम १५ ममाग्रेस्थापयेद्यस्त
प्रासादेऽथगृहेयत्र तीर्थकोटिसहस्राणितत्रतिष्ठंतिदेवताः १६ यस्तंपूजयतेधन्योगरुडोपरिसंस्थितम्
एकादश्यांतथारात्रौवासनासंयुतोमम १७ कृत्वागीतंचनृत्यंचनारयेन्नरकान्पितॄन् पुनश्चकथयिष्यामिकृ-
ष्णघंटामहत्फलम १८ ममनामांकितांघंटांपुरतोयात्रतिष्ठति अर्चितावैष्णवैर्यत्नत्रमाविद्धिपुत्रक १९ यत्रवाद
यतेघंटावैनतेयविचिन्हिता धूपेनीराजनेस्नानेपूजाकालेविलेपने २० ममाग्रेप्रत्यहंवत्सप्रत्येकंलभतेफलम्
मश्वायुतंगोयुतंचचांद्रायणशतोद्भवम् २१ विधिवात्यात्फलापूजासफलाजायतेनृणाम् घंटानादेनतुष्टोहम

च्छामिस्वकंपदम् २२ नागारिचिन्हितांघंटारथांगेनसमन्विता वादनात्कुरुतेनाशंजन्मकोटिभयस्यवै २३
गरुडेनांकितांघंटांदृष्ट्वाहंप्रत्यहंमुदा प्रीतिंकरोमिदेवेशोलक्ष्मीप्राप्ययथाऽधनः २४ घंटादंडस्यशिरसिस्फुच
क्रंस्थापयेत्तुयः मल्प्रियंवैननेयंवास्थापितंभुवनत्रयम् २५ घंटानादंसचक्रंचभ्रमनकालेशृणोतियः पाप ।
तस्यापिनश्यतियमकिंकराः २६ सर्वदोषाःप्रणश्यंतिघंटानादेनवेस्फुत देवतानांसरुद्राणांपितॄणामुत्सवोभ
वेत् २७ अभावेवैननेयस्यचक्रस्यापिनसंशयः घंटानादेनभक्तानांप्रसादंमकरोम्यहम् २८ गृहेयस्मिन्न-
वेन्नित्यंघंटानागारिसंयुता सर्पाणानभयंतत्रनाग्निविद्युत्समुद्भवम् २९ यस्यघंटागृहेनास्तिशंखोनूपुरतोमम
कथंभागवतोज्ञेयः कथंभवतिवल्लभः ३० चंदनस्यप्रवक्ष्यामिमाहात्म्यंतवपुष्कर यस्मिन्कृतेभवेत्प्रीतिर्मम-
मात्यंतंनसंशयः ३१ सचंदनंसकुंकुमकर्पूरागरुमिश्रितम् मृगनाभिसमायुक्तंजातीफलसमन्वितम् ३२
तुलसीचंदनोपेतममात्यंतस्करावहम् योददातिहिमानित्यंतुलसीकाष्ठसंभवम् ३३ युगानिवसतेस्वर्गेत्य
नंतानिनरोत्तम महाविष्णोःकलौभक्त्यादत्वातुलसिचंदनम् ३४ योर्चयेन्मालतीपुष्पैर्नभूयस्तनयोभवेत्
तुलसीकाष्ठसंभूतंचंदनंयच्छतेमम ३५ दहाग्निपानकंसर्वपूर्वजन्मशतेःकृतम् सर्वेषामेवदेवानांतुलसी-
काष्ठचंदनम् ३६ पितॄणांचविशेषेणसदाभीष्टंयथाममम श्रीखंडचंदनंतावत्श्रेष्ठंकृष्णागरुतथा ३७ या
वन्नदृश्यतेपुण्यंतुलसीकाष्ठचंदनम् तावत्कस्तूरिकामोदः कर्पूरस्यस्फुगंधिनः ३८ कलौयच्छतियमत्यंतु-
लसीकाष्ठचंदनम् मार्गशीर्षेशुभेमासेनेकुलाभोनसंशयः ३९ योहिभागवतोभूत्वाकलौतुलसिचंदनम् नो-
र्पयेद्वैसहोमासेनासौभागवतोनरः ४० कुंकुमागरुश्रीखंडकर्दमैर्ममविग्रहम् श्लालिपेद्वैसहोमासेकल्प-
कोटिचसंहिवि ४१ कर्पूरागरुमिश्रेणचंदनेनानुलिंपयेत् मृगदर्पविशेषेणश्रभीष्टंचसदाममम ४२ विलेपयनि

मांवैशंखेकृत्वातुचंदनम् मार्गशीर्षेनदाप्रीतिंकरोनिशानवार्षिकीम् ४३ तुलसीदलेनवामर्त्यंलक्ष्मेणासमु
क्तवने मार्गशीर्षसदाभक्त्यासलभेद्वांछितंफलम् ४४ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येषष्ठोऽध्यायः
६ ५ ब्रह्मोवाच माहात्म्यंवददेवेशपुष्पजातिसमुद्भवम् येनयेनचपुष्पेणयत्फलंलभतेनरः १ श्री
भगवानुवाच शृणुपुत्रप्रवक्ष्यामिमाहात्म्यंपुष्पसंभवम् येनपुष्पेणमेप्रीतिर्भवत्सम्यङ्नसंशयः २ मल्लिका
लनीचैवयूथिकाचातिमुक्तका पाटलाकरवीरंचजयंतीविजयातथा ३ कुब्जकंतबकंश्वेवकर्णिकारंकुरंट
कः चंपकश्चातकःकुंदोबाणकर्चूरमल्लिका ४ अशोकस्तिलकश्चैवतथैवापूरयूथिकः शमीपुष्पमकाशस्तुशा
स्तोमेपूजनेस्मृत ५ केतकीपत्रपुष्पंचभृंगराजस्तथैवच तुलसीपत्रपुष्पंचसद्यःप्रीतिकरंमम ६ पद्मान्यब्जसमु
त्थानिरक्तनीलोत्पलंतथा सितोत्पलंसहोमासेममात्यंतंहिवल्लभम् ७ तान्येवचमशस्तानिकुरुकाणिचमस्क
तं यानिस्युर्वर्ण्युक्तानिरसगंधयुतानिच ८ निर्गंधान्यपिशस्तानिकुरुकाणिमतानिमे स्करभीणिनथान्यानि
वर्जयित्वातुकेतकीम् ९ बाणंचचंपकाशोककरवीरंचयूथिकां पारिभद्रपाटलाचबकुलंगिरिशालिंच १० बिल्व
पत्रंशमीपत्रंपत्रंभृंगिरजस्यच तमालामलकीपत्रंशस्तमपूजनेस्मृत ११ पुष्पैरण्यसंभूतैः पत्रैर्वागिरिसंभवैः
अपर्युषिननिच्छिद्रैःप्रोक्षितैर्जंतुवर्जितैः १२ अथारामोद्भवैर्वापिपुष्पैःसंपूजयेच्चमाम् पुष्पजातिविशेषेण भवे
त्पुण्यंविशेषतः १३ नपःशीलगुणोपेतपात्रेवेदस्यपारगे दशदत्वास्कवर्णानियत्फलंलभतेनरः १४ तत्फललभ
तेमर्त्यःसहेकुरुकमदानतः द्रोणपुष्पैर्नथैकस्मिन्मर्त्यंचविनिर्दिशेत १५ दशदत्वास्कवर्णानिफलंतदधिकंसु
त पुष्पात्पुष्पांतरेभेदोयथासीत्तन्निबोधमे १६ द्रोणपुष्पसहस्रेभ्यःखादिरंतुविशिष्यते खादिरात्पुष्पसा
हस्राद्धकपुष्पंविशिष्यते १७ शमीपुष्पसहस्रेभ्योबिल्वपुष्पंविशिष्यते बिल्वपुष्पसहस्रेभ्योबकपुष्पंवि-

शिष्यते १८ बकपुष्पसहस्रेभ्योनंद्यावर्तंविशिष्यते नंद्यावर्तसहस्राद्धिकरवीरंविशिष्यते १९ करवीरसहस्रस्य कुरुकमश्वेनमुत्तमम् करवीरश्वेनपुष्पान्पलाशंश्वेनमुत्तमम् २० मालतीपुष्पसाहस्रान्संध्यापुष्पंविशिष्यते पलाशस्यसहस्राणिमालतीपुष्पमुत्तमम् २१ मालतीपुष्पसाहस्रान्त्रिसंध्याश्वेतमुत्तमम् त्रिसंध्याश्वेतसाहस्राज्जातिपुष्पंविशिष्यते २२ त्रिसंध्यारक्तसाहस्रात्त्रिसंध्याश्वेतमुत्तमम् सर्वासांपुष्पजातीनांजातीपुष्पमिहोत्तमम् २३ जातीपुष्पसहस्रेणयच्छेन्मालांसुशोभनाम् मत्प्रियोविधिवद्यात्तस्यपुण्यफलंशृणु २४ कल्पकोटिसहस्राणिकल्पकोटिशतानिच मत्पुरेवसतेनित्यंममतुल्यपराक्रमः २५ येषांसंतिचपुष्पाणिप्रशस्तानिममार्चने तेषांपत्राणिशस्तानितद्भावेफलानिच २६ एतैःपत्रैश्चपुष्पैश्चफलैश्चापितयाहिमाम् अर्चयेद्दशसंख्यस्यप्रत्येकंफलमाप्नुयात् २७ एताभिःपुष्पजातीभिःसहोमासेचयंतिच भक्तिंददामितेषांवैतुष्टःसन्नात्रसंशयः २८ धनंपुत्रान्स्त्रियोदारान्यत्किंचिद्वांछितंहिसः तत्तद्ददामिविप्रेंद्रपुष्पैरेभिःप्रतोषितः २९

इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येसप्तमोऽध्यायः ७

ऋ ब्रह्मोवाच श्रीमत्तुलसिमाहात्म्यंयथावद्वर्ण्यतेप्रभो यस्याःसन्निधिमात्रेणप्रीतिर्भवतिमेधिका १ श्रीभगवानुवाच मणिकांचनपुष्पाणितथामुक्तामयानिच तुलसीपत्रदानस्यकलांनार्हंतिषोडशीम् २ तुलसीमंजरीभिर्यःकुर्याद्धिममपूजनम् नसगर्भगृहान्यायान्मुक्तिभागीभवेन्नरः ३ आरोप्यतुलसींवत्सपूजयेत्तद्दलैश्चमाम् दिविसंमोदमानास्तेश्वेतद्वीपेचमेगृहे ४ श्रीमत्तुलस्याश्चयनेसकर्दमांपत्रैःसुगंधैर्विमलैरखंडितैः यत्तस्यपापंपटसंस्थितंतदानिरीक्षयेद्वापरिमार्जयेद्यमः ५ तुलसीनयेषांममपूजनार्थंसंपादितैकादशपुण्यवासरे धिग्योवनंजीवितमर्थसंततिस्तेषांस्फरंतेहचदृश्यतेपरम् ६ लिंगमभ्यर्चितंदृष्ट्वासहोमासेचमामकम् तुलसीपत्रनिकरैर्मुच्यतेब्रह्महत्यया ७

नित्यमभ्यर्चयेद्योवैतुलस्यापरमेश्वरम् महापापानिनश्यंतिकिंपुनश्चोपपातकम् ८ वर्ज्यंपर्युषितंपुष्पंवर्ज्यंपर्युषितंजलम् नवर्ज्यंतुलसीपत्रंनवर्ज्यंजाह्नवीजलम् ९ तावद्भ्रमंतिपुण्यानिमहांतिनिनरासुत यावन्नप्राप्यतेपुण्यातुलसीममचल्लभा १० सकृदभ्यर्चयेद्योमांबिल्वपत्रेणमानवः मुक्तिभागीनिरातंकोममपार्श्वगतोभवेत् ११ बिल्वपत्राच्छमीपत्राज्जातिपुष्पात्सरोरुहात् वल्लभंतुलसीपत्रंकोस्कभादधिकंमम १२ अभिन्नपत्रातुलसीहृद्यामंजरिसंयुता क्षीरोदार्णवसंभूतापद्मानेयंसदाममम १३ अकृष्णाप्यथवाकृष्णातुलसीममवल्लभा सितावाप्यसितावापिद्वादशीममवल्लभा १४ गृहीत्वातुलसीपत्रंभक्त्यायोमासमर्चयेत् अर्पितंतेनसकलंसदेवासुरमानुषम् १५ तावद्भ्रमंतिरत्नानिकौस्तुभादीन्यनंतशः यावन्नप्राप्यतेकृष्णातुलसीकृष्णमंजरी १६ कृष्णंकृष्णातुलस्याहियोभक्त्यापूजयेन्नरः सयातिभुवनंशक्रभंयत्रविष्णुःश्रियासह १७ ममार्चनार्थंभिद्भूणांयच्छंतितुलसीदलम् अन्येषामपिभक्तानांयांतितेपदमव्ययम् १८ तुलसीकृष्णगोरायातयायोमासमर्चयेत् नरोयातितनुत्यक्त्वावैष्णवींशाश्वतीगतिम् १९ ब्रह्मोवाच धूपदानस्यमाहात्म्यंदीपस्यापिचकेशव यत्फलंलभतेमर्त्यस्तन्मेब्रूहियथार्थितः २० श्रीभगवानुवाच शृणुपुत्रमवक्ष्यामिधूपदानस्ययत्फलम् दीपदानस्यमाहात्म्यंममप्रीतिकरंपरम् २१ अगरुंचसकर्पूरंदिव्यचंदनसौरभम् दत्वामासेसहोमासेकुलानांनारयेच्छतम् २२ कृष्णागरुसमुत्थेनधूपेनचममालयम् धूपयेद्यःप्रयत्नेनयत्फलंतन्निबोधत २३ माहिषगुग्गुलयुक्तंघृताज्ययुक्तंससक्करम् धूपंददातियोवैमह्यंतस्येच्छांप्रदद्म्यहम् २४ गुग्गुलोर्हत्यशेषाणिव्यरिष्टाणिचधूपितः कामान्नानाविधांश्चैवव्यगरुः संप्रयच्छति २५ देहंगेहंपुनात्येवधूपस्त्वगरुसंभवः नाशयेद्यक्षरक्षांसिधूपःसर्वरसोद्भवः २६ धूपंदशांगंयदिचेत्करोतिमासेसहे मेव्यतिवल्लभेच ददातिकामाननिदुर्लभानपिबलं

वपुष्टिंकृतदानभक्तिम् २७ मुल्लाधूपोमानुषाणांप्रियत्वंमांगल्यकंवश्यकरंगुडस्यवै कुर्यात्सहोमासिममाग्रतो योविहायपापानिममांशमाप्नुयात् २८ नभयंविद्यतेतस्यदिव्यंभौमांतरिक्षजम् ममधूपावशेषेणयस्यांगंपरिमार्जितम् २९ नचापहियतेनस्यभवंतिसंपदोखिलाः धूपेकृतेसहोमासेममाग्रेश्रद्दधान्विनः ३० धूपःसरूपतांधत्तेधूपःपावनमुत्तमम् वनस्पतिरसोदिव्यःपरमःपावनःशुचिः ३१ अतःपरंवक्ष्यामिदीपमाहात्म्यमुत्तमम् यस्मिन्कृतेनरोयातिवैकुंठनाम्नसंशयः ३२ बहुघृतिसमायुक्तंशुतपूरसमन्वितम् कुर्यादारार्तिकंयावैकल्पकोटिदिवंवसेत् ३३ नीराजनंतुयःपश्येत्सहोमासेममाग्रतः आरार्तिकाद्विजश्रेष्ठप्रविशेन्नामनंतकम् ३४ मंत्रहीनंक्रियाहीनंयत्कृतंपूजनंमम सर्वंसंपूर्णतामेतिकृतेनीराजनेकृत ३५ यःकरोतिसहोमासेकपूरेण चदीपकम् अश्वमेधमवाप्नोतिकुलंचैवसमुद्धरेत् ३६ ममाग्रेवैद्विजानांचदीपंदद्याच्चतुष्पथे मेधावीज्ञानसंपन्नश्चक्षुष्मान्जायतेनरः ३७ घृतेनवाथतैलेनदीपंयोज्वालयेन्नरः सहोमासेममाग्रेचनस्यपुण्यफलंशृणु ३८ विहायसकलंपापंसहस्रादित्यसन्निभः ज्योतिष्मतविमानेनममलोकेमहीयते ३९ तस्मात्सर्वप्रयत्नेनदीपंदद्याद्विचक्षणः नंचदत्वानिहिंस्याद्यःसपतेन्नरकेध्रुवम् ४० दीपंयोवैहरेत्सापीडोभाद्द्वाद्विजोत्तम तद्दीपहरणात्सोपिमूकोंधश्चप्रजायते ४१ इतिश्रीस्कंदपुराणेमार्गशीर्षमासमाहात्म्येविष्णुब्रह्मसंवादेअष्टमोऽध्यायः ८

ऋ ब्रह्मोवाच नैवेद्यस्यविधिंब्रूहिदेवमेतत्वतःप्रभो अन्नंकतिविधंचेष्टव्यंजनादीन्यशेषतः १ श्रीभगवानुवाच साधुपृष्टंत्वयावत्समम्प्रीतिकरंपरम् वक्ष्यामितेऽन्नपानादिव्यंजनादीन्यशेषतः २ आदौहिरण्मयंपात्रंतदभावेचराजतम् तदभावेचपालाशंविस्तीर्णंबहुरुंदरम् ३ कृत्वोलाःशतशःकार्याः पात्रेवैपरितोनघ तन्मध्येव्यंजनादेयानानाफलमयाःशुभाः ४ पायसंचेक्षुसंकाशंपात्रेचेशर्करायुतम् भक्तं

१०

१ दीपखंडनंकुर्यात्.

कुमुदसंकाशंमुद्गान्काचप्रभाञ्छुभान् ५ नानाव्यंजनसंरुद्धंत्रिभिःपक्किभिरेवच निंबूरसेणचार्द्रेणफलमूलयुतेनच
६ वैकृताश्चतदाकार्याःशतशोभोजनेमम द्राक्षास्तुमिश्रिताश्चूतकरमर्दकृताःशुभाः ७ मरीचंपिप्पलीसार्द्रकेलाचार्द्र
कसंयुताः क्वथिकावटिकाःकार्याःशतशोभोजनेमम ८ प्रलेह्नास्तथाकार्याःकचोलशतसंकुलाः नानाकुसुमसमोद्यु-
क्ताःसहसिमेप्रियाः ९ मंडकावतुलाराम्याःसमाःसर्वत्रबिंदुवत् सितयासहितेनायदुग्धेनकथितेनच १० मधुवर्णेन
गव्येनयुक्तेनस्मिन्सुभोजने कचोलस्थभवत्संस्थितंकांचनसप्रभम् ११ घृतसुवासितंप्रीत्यादेयंहिममभोजने तत्र
ोधूममात्रेणचंद्रकेणाहिचोज्ज्वलम १२ सौवाल्लिकाःपूरिकास्तूशनच्छिद्राःसुवेष्टिताः पूरिकाश्चतथाक्षीरप्रकारांस्तु
प्रकारयेत् १३ मणयःसूत्रसंज्ञाश्चमालतीकुसुमादयः पर्पटाबर्बराराम्यामाषकूष्मांडसंभवाः १४ वटकानवधारम्याःकु
र्यान्मासेसहेमम द्विधाजातीमरीचैश्चपूरिकार्द्रेणवैशुभाः १५ युक्तेनलवणेनातिरुद्धतैलेनपूरिताः कुंकुमाभाः
स्नेहहीनाःसक्षताइवदुर्जनाः १६ दधिदुग्धयुताःकेचिच्चिंचणीचूतसंभवाः द्राक्षारसयुताःकेचित्तथान्येक्वथिकायु-
ताः १७ राजिकाजलमध्यस्थातथान्येसितयासह रसैश्चनुर्विधैश्चान्यैर्वटकानवधामताः १८ वज्रप्रभातुकणिका
चारुबीजसुपाचकैः शकलैर्नारिकेलस्यलवंगशतसंयुताः १९ घृतक्षीरसिताघास्ताः कटाहेसुप्रलोडिताः लब्धा
सितादिकुसरराम्यास्निग्धाश्चफेनिकाः २० पराकिकासुवेपक्वाः कृताश्चद्वेणयोलिकाः मोदकास्तत्रवैकार्याश्चारुबी
जभवाःपरे २१ सितयासहिताःकार्याश्चान्येदुग्धेननिर्मयेत् नारिकेलफलैश्चान्येवृक्षनिर्यासनिर्मिताः २२ बदामे-
श्वशुभाश्चान्येतिलैश्चकणबीजकैः ईदृशान्मोदकांश्चान्यांस्तुष्ट्यर्थंममकारयेत् २३ अर्शोघ्नमोचनीकंदंतथार्द्रकर-
मर्दकम् नारिंगंचिंचणीकंचकंकोलफलमेवच २४ दृशारात्रिपुरीजातशुभनिंबफलंबिसम् तिंदूफललवंगचश्यो
फलंनिलकंलुती २५ वल्कलंवंशकारीरंतथाकायफलंबलम् द्राक्षाफलंचूतफलंरम्यंकंटकिनीफलम् २६ धात्री

फलंशक्तिभवंफलमंबाडवंतथा रंभाफलंपिप्पलीचमरीचाश्वमनोहराः २७ शक्तूसर्षपनैलेनलवणेनसूवेधितम्
तथारजिकयाबिल्वत्रिभिर्वर्षैर्घटेस्थितम् २८ एवंविधानिजानानिव्यंजनानिचमानद कर्तव्यानिसहोमासंममप्रीतिकराणिवै २९ एतादृशेभोजनेचेदसामर्थ्यंभवेद्यदि एवंकार्यंतदातेनसंक्षेपेणशृणुष्वमे ३० लड्डुकमेकंघृतपूरमेकंफेनद्वयंकोकरसत्रयंच घृतप्लुतंमंडकषोडशानावदाष्टदायीनरकंनपश्येत् ३१ अर्धाढकस्फुचिरपर्युषितं चदध्नःखंडस्यषोडशपलानिशशिप्रभस्य सर्पिःपलंमधुपलंमरिचंद्विकर्षंसूच्यापलार्द्धंद्विपलंचपलंचतुर्णाम् ३२ श्लक्ष्णंयदेलत्वचामृदुपाणिघृष्टंकर्पूरधूलिधवलीकृतभांडसंस्था एषाशुभारसवतीग्रकरोतियोवैकामान्ददा-मिसकलान्मनुजस्यतस्य ३३ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येविष्णुब्रह्मसंवादेनवमोध्यायः ९

ब्रह्मोवाच नैवेद्यानंतरंतात्किंकर्तव्यंनृभिःप्रभो यत्कर्तव्यंसहोमासंतत्सर्वंब्रूहितत्वतः १ श्रीभगवानुवाच अथभुक्तवतेप्रीत्याजलैःकर्पूरवासितैः आचमनंचतांबूलंचंदनैःकरमार्जनम् २ पुष्पांजलिंततःकुर्यात्भक्त्यादर्शंयदर्शयेत् नीराजनंततःकार्यंकर्पूरधिभवेसति ३ मदर्थंमुकुटादीनिभूषणानिविचक्षणः ततःप-श्चान्महाभागप्रकल्प्यछत्रचामरे ४ प्रसादसुमुखध्यात्वाश्यामस्कंदविग्रहम् जपेदष्टोत्तरशतंस्तुवीतस्तुतिभिः प्रभुम् ५ शंखरौप्यमयीमालाकांचनीचविशेषतः पद्माक्षैश्चैवसंभोर्वद्रुमैर्मणिमौक्तिकैः ६ रचितेदाक्षकैर्माला तथैवांगुलिपर्वभिः पुत्रबीजमयीमालाशस्तावैजपकर्मणि ७ नचक्रमन्नचहसन्नपार्श्वमवलोकयन् नपदाप्रदमाक्रम्यकरप्राप्तशिरस्तथा ८ नोत्तिष्ठन्नमनुविद्वान्नजपेद्धयग्रमानसः जपकालेनभाषेतव्रतहोमार्चनादिषु ९ गृहेष्वेकगुणंजाप्यंगोष्ठेदशगुणंभवेत् नदीतीरेशतंविद्यादग्न्यागारेदशाधिकम् १० तीर्थादिषुसहस्रंस्यादनंतंमसन्निधौ एवंकृत्वासहोमासेयःकुर्याच्चप्रदक्षिणाम् ११ सप्तद्वीपवतीपुण्यंलभतेसपदेपदे पठन्नामसं-

११

हस्तंतुअथवानामकेवलम् १२ एकाप्रदक्षिणाभक्त्यादहेत्पापंसदान्हिकम् प्रदक्षिणीकृतातेनसप्तद्वीपावसुंधरा
१३ दिनसप्तोद्भवंपापंक्षणेनिस्त्रप्रदक्षिणाः तत्क्षणान्नाशयत्येवपापंदेहदशान्हिकम् १४ कृताः प्रदक्षिणायेन
एकविंशतिभक्तिनः भ्रूणहत्यादिपापानिनाशमायांतितत्क्षणात् १५ अष्टोत्तरशतंयेनकृताभक्त्याप्रदक्षिणाः
नेनेष्टक्रतुभिःसर्वैःसमासवरदक्षिणैः १६ प्रदक्षिणीकृतानेननावह्वारंवसुंधरा मातुःप्रदक्षिणास्तद्वद्गुरुधात्रीप्र
दक्षिणाः १७ शालिग्रामशिलायाश्चसममेतत्प्रयंस्मृतम् एकश्चदंडपातश्चसहस्रसमप्रदक्षिणाः १८ सममेतद्वयं-
नोवादंडपानोविशिष्यते प्रदक्षिणेदंडपानंप्रःकरोतिसदाममं १९ सहोमासंविशेषेणाश्वाकल्पंसवसेद्दिव कृत्या
दनंतरंनातचक्रवर्तीप्रजायते २० चिरायुर्धनवान्भोगीदानवान्धर्मवत्सलः सहस्रनामपठनात्पापंनश्येत्त्रिधा
कृतम् २१ श्रयकिंबहुनोक्तेनश्रृणुगुह्यंचमेसुत दामोदरेतिनाम्नावैभवेत्प्रीतिर्ममाऽतुला २२ गुणसंबंधिनेना
मकृतंमान्नायशोदया यदामृद्दधिभांडस्यस्फोटनंगोकुलेकृतम् २३ यशोदयातदागादेवृद्धोदाम्नात्वुत्तूरवले
नतः प्रभृतिमेनामकृतंदामोदरेतिच २४ नमोदामोदरायेतिजपेद्यःसुसमाहितः सूर्योदयेशुचिर्भूत्वानिसह
स्रादिनेदिने २५ साङ्गलक्षत्रयंयावत्तनउद्यापयेद्बुधः तर्पणंहवनंचैवब्रह्मभोज्यदशाशतः २६ एवंयःकुरुते
भक्त्यातस्ययच्छामिवांछितम् धनधान्यतथादारान्पुत्रांश्चान्यच्चवांछितम् २७ त्रिःसत्येनमयाचोक्त्यद्गु-
ह्यमहामते मंत्रराजमिमंपुत्रकृपयामेप्रकाशितम् २८ दामोदरायेतिपठन्नित्यंकुर्यात्प्रदक्षिणाम् दंडपातंत
थापुत्रंअष्टांगेनसमन्वितम् २९ पद्भ्यांकराभ्यांजानुभ्यामुरसाशिरसातथा मनसावचसादृष्ट्याप्रणामोऽष्टांग
उच्यते ३० शिरोमस्तादयोःकृत्वाबाहुभ्यांचपरस्परम् प्रपन्नंपाहिमामीशभीतंमृत्युग्रहार्णवात् ३१ पश्चाच्छे-
षांमयादत्तांशिरस्यादायसादरम् एवंब्रूयात्ततोवत्समपूजांप्रवर्तयेत् ३२ मंत्रहीनक्रियाहीनंभक्तिहीनज-

नार्दन यत्पूजितंमयादेवपरिपूर्णेनदत्तकम्मे २३ मृदंगवाद्येनसमंघण्टवेनस्कंसंयुतम् एवंकार्यसहोमासेनृ-
त्यंपुण्यप्रदनृणाम् ३४ गीतवाद्यंचनृत्यंचतथापुस्तकवाचनम् पूजाकालेचतुर्वक्त्रसर्वदाममचप्रियम्
३५ गीतवाद्याद्यभावेचममनामसहस्रकम् स्तवराजंतथापुत्रगजेंद्रस्यचमोक्षणम् ३६ अनुस्मृतिश्च
गीतान्चस्तवनंपंचधामनम् पंचस्तवंमहाभागममप्रीतिकरंपरम् ३७ पादोदकंपिबेद्योवैशालग्रामसमुद्भव
पंचगव्यसहस्रैस्तुप्राशितैःकिंप्रयोजनम् ३८ शालग्रामशिलातोयंयःपिबेद्वैदुनासमम् मातुस्तन्यंपुननैव-
सपिबेन्मुक्तिमान्नरः ३९ अशौचनैवविद्येतसूतकेमृतकेपिच येषांपादोदकंमूर्ध्निप्राशनंयैः प्रकुर्वते ४० अं
तकालेपियस्येदंदीयतेपादयोर्जलम् सोपिसद्यनिमान्नानिसदाचारबहिष्कृतः ४१ सोपिपूतोभवत्याशुस
द्यःपादांबुधारणात् चांद्रायणात्सादकृच्छ्रादधिकंपादयोर्जलम् ४२ अपेयंयेपिबतेयत्कभुक्तेयश्चाप्यभो-
जनम् अगम्यागमनयोर्वेपापाच्चारश्वयोनरः ४३ अगरुकुंकुमवापिकर्पूरश्चानुलेपनम् मूर्ध्नपादांबुसंस्पृष्ट
नद्वैपावनपावनम् ४४ दृष्टिपूतंनुयत्तोयंभवेद्वैविप्रसत्तम नद्वैपापहरंनृणांकिंपुनःपादयोर्जलम् ४५ इ-
तिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येब्रह्मविष्णुसंवादेदशमोऽध्यायः १० ७ ब्रह्मोवाच ए
कादश्याश्चमाहात्म्यंऽस्मिंश्चविधानकम् सर्वंब्रूहिममस्वामिन्कृपयाभूतभावन १ श्रीभगवानुवाच
शृणुष्वद्विजशार्दूलकथांपापप्रणाशिनीम् यांश्रुत्वायानिखिलंयंपापब्रह्मवधादिकम् २ कांपिल्यनगरेराजा
वीरबाहुरितिस्मृतः सत्यवादीजितक्रोधोब्रह्मण्योममतत्परः ३ भाववान्सदयाशीलोरूपवान्बलवत्तरः भ
क्तोभागवतेनृणांसदाममकथारुचिः ४ सदाममकथासक्तःसदाजागरणप्रियः दानाविद्वान्क्षमाशीलो
विक्रमीविजितेंद्रियः ५ विजयीरणशीलश्चकृद्याचधनदोपमः पुत्रवान्पशुवाञ्चैवस्वदारनिरतस्तथा ६

नस्यभार्याकांतिमतीरूपेणाप्रतिमाभुवि पतिव्रतामहासाध्वीममभक्तिरतासदा ७ तयासहविशालाक्षोबुभु
जे मेदिनींयुवा मुक्त्वैकंमांमहाबाहोनान्यंजानातिदैवतम् ८ एकस्मिन्दिवसेपुत्रभारद्वाजोमहामुनिः समाग
तोगृहेनस्यवीरबाहोर्महात्मनः ९ दृष्वासमागतोदूरात्भारद्वाजमहामुनिम् स्वागतंकारयामासदत्वार्घ्यंवि
धिवत्तदा १० आसनंकल्पयामासत्वयमेवमहीपतिः प्रणम्यपरयाभक्त्यातस्थौमुनिवराग्रतः ११ राजोवा
च अद्यमेसफलंजन्मह्यद्यमेसफलंदिनम् ह्यद्यमेसफलंराज्यमद्यमेसफलंगृहम् १२ प्रसन्नोममविप्रर्ष
भप्रसन्नात्माजनार्दनः यत्त्वंसमागतोत्यद्यगृहेयोगिवरस्तथा १३ मुक्त्वाहंपापकोट्याद्ययत्त्वयाहंनिरीक्षितः
राज्यंलक्ष्मीर्गजाश्वाश्वमयानुभ्यंनिवेदिताः १४ वैष्णवोसिमुनिश्रेष्ठनास्त्यदेयंमयानव मेरुतुल्यंभवेत्सर्वं
वैष्णवस्ययराटिका १५ नयातिहिगृहेयस्यवैष्णवोयंद्विजोत्तमः तद्दिनंविफलंतस्यकथितंब्राह्मणेमम
१६ विष्णुभक्ताश्चयेकेचित्सर्ववर्णाद्विजातयः कथितंममगार्ग्येणगौतमेनसमंतुना १७ येत्वभक्तादृषीके
शेपिशाचास्तेहिमानवाः महापातकलिप्तास्तेयेभुंजंतिहरेर्दिने १८ शिवव्रतसहस्रैस्तुसौरब्राह्मैश्चकोटिभिः
यत्फलंकविभिः प्रोक्तंवासरैकेनतद्धरेः १९ गर्वमुद्वहनेनावत्तिथिर्ब्राह्मीचकेसरी यावन्नायातिविप्रेंद्रद्वादशी
शीघ्रममप्रिया २० तावत्प्रभावस्तारायांयावन्नोदयतेशशी तिथिस्तथाचविप्रेंद्रयावन्नायातिद्वादशी २१
नारदेनपुराप्रोक्तंवसिष्ठेनममाग्रतः त्वंवेत्तासर्वधर्माणांवैष्णवानांमहामुने २२ भारद्वाजउवाच साधुपृ
ष्टंमहाभागयत्त्वंभक्तोसिवैष्णवः सांप्रजामहीधन्यायत्त्वंरक्षसिभूमिप २३ तस्मिन्राष्ट्रेनवास्तव्यंयत्रराजा
जानवैष्णवः वरंवासोवनेनीर्ये ननुराष्ट्रेत्ववैष्णवे २४ यत्रभागवतोराजोसंप्रशास्तिचमेदिनीम् वैकुंठमिनिमंत
व्यंतद्राष्ट्रंपापवर्जितम् २५ चक्षुर्हीनोयथादेहोपनिर्हीनायथास्त्रियः द्वादशीदशमीयुक्तानथाराष्ट्रमवैष्ण

वम् २६ दानहीनोयथासज्ञाब्राह्मणोरसविक्रयी द्वादशीदशमीयुक्तायाराष्ट्रमवैष्णवम् २७ दंतहीनोय
थाहस्तीपक्षहीनोयथाखगः द्वादशीदशमीयुक्तायाराष्ट्रमवैष्णवम् २८ प्रतिग्रहार्थंवेदादिदंभार्थंस्मृतंत-
था द्वादशीदशमीयुक्तायाराष्ट्रमवैष्णवम् २९ दर्भहीनत्यथासंध्यायथाश्राद्धमदक्षिणम् द्वादशीदशमीयु
क्तायाराष्ट्रमवैष्णवम् ३० सशिरश्चयथाशूद्रंकपिलाक्षीरपायिनम् द्वादशीदशमीयुक्तायाराष्ट्रमवैष्णवं
३१ ब्राह्मणीगामिनंशूद्रंहेमघ्नंधर्मदूषकम् द्वादशीदशमीयुक्तायाराष्ट्रमवैष्णवम् ३२ हरिस्मृत्यादिवृक्षा
णांयथाच्छेदनरोत्तम् द्वादशीदशमीयुक्तायारा० ३३ यथाहुतिर्मंत्रहीनामृतवत्सापयोयथा द्वादशीदश
मीयुक्तायाराष्ट्रमवैष्णवम् ३४ सकेशाविधवायद्वद्वतंस्नानविवर्जितम् द्वादशीदशमीयुक्तायाराष्ट्रमवै-
ष्णवम् ३५ सराजाप्रोच्यतेसद्भिर्योभक्तोमधुसूदने नद्राष्ट्रंवर्धतेनित्यंस्करवीभवतिसाप्रजा ३६ दृष्टिर्मेसु
फलाराजन्यत्वयाहनिरीक्षितः अद्यमेसफलावाणीजल्पतयात्वयासह ३७ दूरमेवहिगंतव्यंश्रूयतेयत्रवै
ष्णवः दर्शनात्तुभवेत्पुण्यंतीर्थस्नानसमुद्भवम् ३८ सत्वराजन्मयापृष्टोविष्णुभक्तिरतःशुचिः स्वास्तेतस्कग-
मिष्यामिस्करवीभवनराधिप ३९ एतस्मिन्नंतरेराजाकांतिमत्यानमस्कृतः भारद्वाजोमुनिःश्रेष्ठः प्रवरःसर्व-
योगिनाम् ४० अवैधव्यंवरारोहेभक्ताभवस्वभर्तरि निश्चलाकेशवेभक्तिःसदाभवतुतेशुभे ४१ एतस्मिन्न
न्तरेराजाभारद्वाजंमहामुनिम् उवाचप्रीणयन्वाचामेघनादगभीरया ४२ राजोवाच विपुलामेकथलक्ष्मीः
किंकृतंपूर्वजन्मनि सर्वंब्रूहिमुनिश्रेष्ठकृपायदिममोपरि ४३ एतन्मयाकथंप्राप्तंराज्यनिहतकंटकम् पुत्रोवै
गुणवान्श्रेष्ठःप्रियाचरुचिरानना ४४ मच्चित्तामद्गतप्राणाचिंतयंतीजनार्दनम् कोहंमुनेकथंचैषाकिंचधर्मामया
कृतः ४५ किंवानयापिचार्वंग्याममपत्न्याकृतंमुने केनपुण्येनमेलक्ष्मीर्मृत्युलोकेसुदुर्लभा ४६ अशेषाभूमि

पालावैवर्ततेष्वस्यमेवशे विक्रमंचाप्रतिहतंशरीरारोग्यतातथा ४७ ममापिविपुलंतेजोनकश्चित्सहतेमुने इ-
च्छामेद्यप्रतिज्ञातुंयथात्वेयमुनिंदिता ४८ मयापिस्वकृतंविप्रकिंकृतंपूर्वजन्मनि इतिपृष्टोनरेंद्रेणपूर्वजन्मविचे
ष्टितम् ४९ सपत्न्याश्चेष्टितंचैवसपदाचैवकारणम् योगस्थःस्मचिरकालंतयाविंदेतमानसे ५० विज्ञातमेतन्नृ
पतेपूर्वजन्मविचेष्टितम् तवपत्न्याश्चराजर्षेशृणुष्वकथयाम्यहम् ५१ भरद्वाजउवाच शृणुभूपालसक्रु-
लयस्यैदकर्मणःफलम् त्वमासीःशूद्रजातीयोजीवहिंसापरायणः ५२ नास्तिकोदुष्टचारित्रःपरदारप्रधर्षकः
क्रूरश्चोदुर्विनीतश्चस्कष्ट्वाचारविवर्जितः ५३ याइयंभवतोभार्यापूर्वमप्यायतेक्षणा कर्मणामनसावाचानान्य
दस्यास्त्वयाविना ५४ पतिव्रतामहाभागाभजमानानिरंतरम् भावनकुरुतेदुष्टतयोपरिनृपासति ५५ स
खिभिस्त्वंपरित्यक्तोबंधुभिःपापकर्मकृत् क्षयंजगामचार्थोयःसंचितस्त्वपूर्वजैः ५६ नष्टद्रव्यफलाकांक्षी
त्वमासीज्जगतीपते पूर्वकर्मविपाकेनकृषिश्चविफलागता ५७ ततोवित्तेपरिस्त्रीणेपरित्यक्तश्चबांधवैः क्षी
यमाणापिसाध्वीयंनात्यजत्त्वांनभामिनी ५८ त्वमनःसर्वकामेभ्योगतवान्निर्जनेवने हत्वाजीवान्नेकांश्चव
कारात्मविपोषणम् ५९ एवंप्रवृत्तस्यतवसहपत्न्यामहानृप गतान्निबहुवर्षाणिपापवृत्त्यामहीपते ६० अ
न्यस्मिन्वत्सरेराजन्मार्गभ्रष्टोमहामुनिः नदिशंविदिशंवेत्तिदेवशर्माद्विजोत्तमः ६१ क्षुत्तृषापीडितोत्यर्थंम
ध्यान्हगंदिवाकरे पतितोवनमध्येतुमार्गभ्रष्टोमहीपते ६२ दयाजातात्वयाभूप दृष्ट्वादुःखेनपीडितम् ब्राह्मणंवृ
द्धमज्ञातंगृहीत्वातुकरेणवै ६३ उत्थाप्यपतितंभूमौत्वयोक्तंहितदानृप प्रसादंकुरुविप्रर्षेआगच्छत्वंममाश्र-
ममू ६४ जलपूर्णतडागंचपद्मिनीखंडमंडितम् वृक्षैर्मनोहरैर्युक्तफलैःपुष्पैर्मनोरमैः ६५ स्नात्वाप्रशीत
लेतोयेकृत्वाकर्मचनैत्यकम् विश्रांतोवृक्षमूलेभूद्देवशर्माद्विजोत्तमः ६६ साष्टांगंमुनयेकृत्वानमस्कारंसहस्रि

या शूद्रस्तुपरयाभक्त्याप्रोवाचमुनिसन्निधौ ६७ आवयोस्तरणार्थायभ्मनिधिस्त्वंसमागतः स्करवेनकुरुवि
श्रामंमयासंरक्षितःस्वयम् ६८ उत्तिष्ठत्वंद्विजश्रेष्ठप्रसादंकर्तुमर्हसि लब्धसंज्ञस्तदाविप्रःश्रुत्वाशूद्रस्यभाषि
तम् ६९ करेजग्राहशूद्रतूर्णतोयन्नजलाशयः उपविष्टोमहाबाहोछायामाश्रित्यनत्तटे ७० स्नानंचकारविधिव
त्पूजयामासकेशवम् तर्पयित्वापितॄन्देवान्पपौनीरंस्वशीतलम् ७१ शूद्रउवाच दर्शनात्तवविप्रर्षेजा
तःपापस्यसंक्षयः प्रायःफलानिस्वादूनिप्रयच्छाम्यिद्विजातये ७२ मृदूनिरसयुक्तानिस्वपक्वानिमियाणि
ब्राह्मणउवाच त्वामहंनैवजानामित्वत्तानिकथयस्वमे नाज्ञातस्यहिभोक्तव्यंब्राह्मणास्यापिपुत्रक
७३ शूद्रउवाच शूद्रोहंद्विजशार्दूलनकार्यःसंशयस्त्वया आत्मजैर्दुर्जनैर्विप्रपरित्यक्तःस्वबंधुभिः ७४
तयोःसंवदतोरेवंशूद्रपत्न्याफलानिच दत्तानितस्मैविप्रायतेनभुक्तानितानिच ७५ अभूत्प्रीतमनाविप्रः
पीत्वानीरंस्वशीतलम् स्करवंसंप्राप्यसमुनिर्विश्रांतस्तरुमूलकैः ७६ सचशूद्रःसपत्नीकोभुक्त्वान्नंपुनरागतः
स्वागतंतेमुनिश्रेष्ठकुतस्त्वमिहचागतः ७७ शून्याटवींद्विजश्रेष्ठदुष्टसत्वभयाकुलाम् निर्मनुष्यांदुःखयुक्तांदि
वारात्रभयानकाम् ७८ ब्राह्मणउवाच ब्राह्मणोहंमहाभागप्रयागगमनंप्रति अहमज्ञातमार्गेणप्रवि
दारुणेवने ७९ ममपुण्यप्रभावेनजानोसिवरबांधवः जीवितंमेत्वयादत्तंब्रूहिकिंकरवाणिते ८० भवा
नपिकुतःप्राप्तोनिर्मनुष्येवनेखलु कोभवान्कारणंकिंचित्कथयस्वममाग्रतः ८१ शूद्रउवाच विद-
र्भनगरीराज्ञाभीमसेनेनरक्षिता वासोममहाराज्येशूद्रोहंपापलंपटः ८२ स्वकर्मविहितोधर्मोमयात्यक्तो
द्विजोत्तम त्यक्तोहंबंधुवर्गेणततोहंवनमागतः ८३ कृत्वाजीववधंनित्यंजीवेहंभार्यायासह सा ।तक
स्मात्कनिर्विण्णोस्मिमहामुने ८४ कुरुष्वानुग्रहंकिंचित्सापयुक्तस्यमेप्रभो ममपुण्यविभागेनआगत-

स्त्वंद्विजोत्तम ८५ नपश्यामियथासौरिंपत्न्यासहमहासुने उपदेशप्रभावेनप्रसादंकर्तुमर्हसि ८६ नान्य-
दिच्छाम्यहंकिंचिन्मुक्तादेवजनार्दनम् कुरुष्वानुग्रहंमेद्यप्रसादमृषिसत्तम ८७ भारद्वाजउवाच इतितेन
समापृष्टोदेवशर्माद्विजाग्रणीः शृद्धेणपरयाभक्त्याप्रहसन्वाक्यमब्रवीत् ८८ इतिश्रीस्कंदपुराणेमार्गशी
र्षमाहात्म्येविष्णुब्रह्मसंवादेएकादशीव्रतारंभनामैकादशोऽध्यायः ११ ऋ देवशर्माउवाच न
दशमीनिर्जातासहसाकेशवोपरि एतस्मात्तेगतंपापंपूर्वजन्मशतोद्भवम् १ विनाव्रतैर्विनानीर्थैर्मुक्तस्त्वंपाप
कोटिभिः मूमानिष्येनभक्त्याच्जातंतवहरेःपदम् २ तेनपुण्यप्रभावेनमतिर्जातातवेदृशी ध्यात्वासचिंत्य
मनसाज्ञानपूर्वविचेष्टितम् ३ पूर्वजन्मनिविप्रस्त्वमवस्थाधर्मतत्परः सदाध्ययनशीलश्चसदाव्रती
४ एकादशीविष्णोः कृतादशमिसंयुता तत्पापस्यप्रभावेनसमस्तंकृतगतम् ५ सर्वंताद्दिफल-
जातंयथाशूद्रापतिर्द्विजः बहुवर्षसहस्राणिप्राप्तानरकयातना ६ तस्मादेवत्वयासर्वंकृतदुष्टंचिरंबहु कृ
तादशमीमिश्रानिर्थिर्विष्णोर्महात्मनः ७ तेनशूद्रोभवान्जातः पापेनवर्मनिस्तथा धर्मेनरमतंचित्तंदशमी-
वेधदूषितम् ८ विदर्भनगरेवत्स्यश्चलितेपुरिकासकृतः कृतंतेनविधानोक्तंहरेरेकादशीव्रतम् ९ प्रदत्तेनतत-
पुण्यमरवर्डैकादशीव्रतम् धर्मोपरिमनिर्जातानतःपापस्यसक्षयः १० तेनपुण्यप्रभावेनएकादश्याव्रतेनच
दशमीवेधजंपापंयमेनपरिमार्जितम् ११ इहजन्मनियत्पापंजन्मायुतकृतानिच मार्जितानियमेनैव पापा
नितवसांप्रतम् १२ तयोर्विवदतोरेवंविष्वक्सेनःसमागतः वर्णांतरस्थागतंतेतुष्टस्तेहंजनार्दनः १३ विप्रस्या
तिथ्यहेतुत्वाज्ज्ञातःपापस्यसक्षयः परदत्तेनपुण्येनएकादश्याव्रतेनच १४ दशमीवेधजंपापंतवशूद्रत्वयंगतं
घनकृत्वाददोपुण्यंदौहित्रस्तेनतारितः १५ पत्न्यासहमहाभागवैनतेयंसमारुह इत्युक्तादेवदेवेनविमाने

स्थापितस्तदा १६ स्वर्गगतःसपत्नीकः शूद्रत्वेननृपोत्तम देवशर्मातुविप्रोवैनीर्यराजंययौपुनः १७ एतत्तेस
र्वमाख्यातंयत्वयापरिपृच्छितम् अखंडैकादशीपुण्यात्सामान्यकारणात् १८ राजोवाच ब्रह्मन्न-
खंडैकादश्याविधिसम्यक्समादिश विष्णोःसंप्रीणनार्थायप्रसादंकर्तुमर्हसि १९ ऋषिरुवाच शृणुष्व
नृपशार्दूलएकादश्याविधिंशुभम् पुरासीद्भगवान्विष्णुर्नारदाययदुक्तवान् २० तत्तेहंसंप्रवक्ष्यामिउद्यापन-
विधिंशुभम् मार्गशीर्षादिमासेषु द्वादशीषुनरोत्तम २१ अनंशुभमिदंकार्यमखंडैकादशीव्रतम् दशम्या
चैवनक्तंच एकादश्यामुपोषणम् २२ द्वादश्यामेकभक्तंचअखंडाइतिकथ्यते दिवसस्याष्टमेभागेमंदीभूते
दिवाकरे २३ तद्दिनक्तंविजानीयान्नानक्तंनिशिभोजनम् कार्त्तिकेमासिमसूरांश्चचणकान्कोद्रवांस्त्यजेत् २४
शाकंमधुपरान्नंचपुनर्भोजनमैथुनं विष्णुभक्तोनरोवापिदशम्यादशवर्जयेत् २५ दशम्याविधिरुक्तोयमेका
दश्यास्त्वथाशृणु असकृज्जलपानंचहिंसाशौचमसत्यताम् २६ तांबूलदंतकाष्ठंचदिवाशयनमैथुनम् द्यूतं-
क्रीडांनिशिस्त्रापः पतितैःसहभाषणम् २७ एकादश्यांदशैतानिविष्णुभक्तस्तुवर्जयेत् अद्यमेरात्रौस्थितं
नास्तिभोजनंनास्तिकेशव २८ प्रीत्यर्थंनवदेवेशनियमस्तेदिवानिशि २९ स्नात्वाद्वियेस्तकेवैक्लव्यभोजनय
च्चमैथुनम् दंतांतरविलग्नानांक्षमस्वपुरुषोत्तम ३० उपावृतःसपापेभ्योयस्तुवासोगुणैःसह उपवासः
सविज्ञेयोनशरीरस्यशोषणम् ३१ पूर्वोक्तानिदशैतानिपरान्नंचतथामधु द्वादश्यांविष्णुभक्तोवैवर्जयेन्म
दनादिकम् ३२ अद्यमेद्वादशीपुण्योपवित्रापापनाशिनी पारणंचकरिष्यामिप्रसीदगरुडध्वज ३३ विष्णोः
संतोषणार्थायत्वयामयानियमःकृतः अद्याहंभोजयिष्यामित्वत्प्रसादाद्धिजोत्तम ३४ अनेनविधिनाकुर्या-
न्यावद्वर्षंसमाप्यते संपूर्णेतुततोवर्षेकुर्याद्विद्यापनंबुधः ३५ आदौमध्येतथाचांतेव्रतस्योद्यापनंस्मृतम्

उद्यापनंनकुर्याद्यः कुष्ठीचांधश्चजायते ३६ तस्मादुद्यापनंकुर्याद्यथाविभवसारतः क्रियतेशुक्लपक्षेचमासेमा
र्गशिरेशुभे ३७ आमंत्र्यद्वादशमितान्ब्राह्मणान्विधिकोविदान् त्रयोदशंसपत्नीकमाचार्यंविधिकोविदम्
३८ यजमानःशुचिःस्नात्वाश्रद्धायुक्तोजितेंद्रियः पादशौचार्घवस्त्राणिआचार्यादींस्ततोर्चयेत् ३९ आचार्यस्तु
ततःकृत्वामंडलंवर्णकैःशुभैः चक्राब्जसर्वतोभद्रंश्वेतवस्त्रेणवेष्टितम् ४० जलपूर्णंचकुंभंतुपंचरत्नसमन्वितं
पंचपल्लवसंयुक्तंकर्पूरागरुवासितम् ४१ वेष्टितंरक्तवस्त्रेणताम्रपात्रेणसंयुतम् वेष्टितंपुष्पमालाभिर्मंड-
लोपरिविन्यसेत् ४२ तस्योपरिन्यसेद्देवंलक्ष्मीनारायणंनृप सौवर्णप्रतिमाकार्याकर्षमेकप्रमाणतः ४३
बाहुनायुधसंयुक्तंप्रमाणंचतुरंगुलम् नोवाशक्त्याप्रकुर्वीतवित्तशाठ्यंविवर्जयेत् ४४ ततःसंस्थापयेन्मूर्तिं
मंडलेद्वादशेवाहि मासानामधिपाः पूज्याश्चखंडव्रतहेतवे ४५ मंडलात्पूर्वदिग्भागेशंखंसंस्थापयेच्छुभम्
लपुरासागरोत्पन्नः पांचजन्यनमोस्तुते ४६ ततस्तुस्थंडिलंकार्यमंडलादुत्तरादिशम् संकल्प्यहवनंकार्यमंत्रै
र्वेदोक्तवैष्णवैः ४७ स्वस्थानेस्थापितंविष्णुंस्थापयेत्पंचकैर्हरिम् पूजयेत्पुरुषसूक्तेनमंत्रैःपौराणिकैःशुभैः
४८ नैवेद्यार्थंचवैकार्यामोदकाबहवोपिच धूपदीपोपहाराणिकृत्वानीराजनंततः ४९ यज्ञकर्दमेनसंपूज्यततः
कुर्यात्प्रदक्षिणाम् स्वस्तिवाचनकैर्विप्रैर्नमस्कारंततोनृप ५० ततस्तुब्राह्मणैःकुर्यात्प्राचार्यःक्रमशोजपं रूपंस्व
पावमानीयमंडलैर्ब्राह्मणंभुवि ५१ तेजोसिशुक्रमंत्रंवाब्रह्मसामादनंतरम् पवित्रंसर्वसूक्तस्यविष्णोर्हृग्भासंस
हिताम् ५२ जपांतेकलशेविष्णुंसोपायमुपरिन्यसेत् दिवसस्योदयेचैव होमंकुर्यादनुक्रमम् ५३ संस्थाप्य
मथमपात्रंपूजयित्वाविधानतः स्तवनंचततोहोमः कर्तव्यश्चरुपूर्वकः ५४ स्वगृह्योक्तविधानेनाग्निसूत्रक्रिया
परः चरुद्वयंचकुर्वीतपायसंवैष्णवंचरुम् ५५ जुहुयात्पुरुषसूक्तेनचरोराहुतयोदश तथाचरुगृहीतेनघृत

युक्तंचचाहुतिः प्रादेशमात्रपालाशसमिधांचघृतप्लुता इदंविष्णुरितिमंत्रेणहोतव्याकर्मशुद्ध्ये ५७ शतमेकंतु जुहुयाद्द्विगुणान्वनिलाहुतीः कृतेचवैष्णवेहोमेगृह्यसंस्कारभेत् ५८ समिद्भिश्चरुहोमंचतिलहोमंक्रमेण तु उभयोःस्वस्तिकंवाच्यंननःपूजांसमाचरेत् ५९ ऋत्विजानांततोदद्याद्धेनून्वागृहदक्षिणाः देवस्यतुष्ट्यैदद्या च्चब्राह्मणायथाविधि ६० गांवैपयस्विनींदद्याद्वृषभंचसुशोभनम् ब्राह्मणानांततोदद्याच्चयोदशापूदानिच्च ६१ आचार्यंतुसपत्नीकंवस्त्रैश्चपरिधापयेत् तोषयित्वामहादानैस्तैःसार्धंचसमर्पयेत् ६२ पंचविंशतिकुंभां श्चसोदकान्वस्त्रवेष्टितान् ब्राह्मणानांततोदद्यात्कृतेपारणकेविशि ६३ भूमिदानंचदातव्यंबंधूनामिष्टभोजनं पूर्णपात्रंततोदद्यादाचार्यायसदक्षिणम् ६४ पूर्णपात्रप्रदानेनकार्यंसंपूरितंभवेत् उपवासव्रतंचैवस्नानंतीर्थ फलंभवेत् ६५ विप्रैःसंभाषितंतस्यसंपूर्णंतद्भवेत्फलम् वित्तशक्तिर्गृहेनास्तिकृतंचैकादशीव्रतम् ६६ स्वशक्त्याचैवकर्तव्यंतथाचोद्यापनादिकम् एतत्तेसर्वमाख्यानमरवंडैकादशीव्रतम् ६७ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येविष्णुब्रह्मसंवादेऽरवंडैकादशीव्रतकथनंनामद्वादशोऽध्यायः १२ ७ श्रीभगवानुवाच शृणुपुत्रप्रवक्ष्यामिजागरस्यचलक्षणम् येनविज्ञानमात्रेणसकलोहसदाकलौ १ गीतंवाद्यंचनृत्यंच पुराणपठनंतथा धूपंदीपंचनैवेद्यपुष्पगंधानुलेपनम् २ फलार्पणंचश्राद्धंचदानमिंद्रियसंयमम् सत्यान्वित विनिद्रंचमुदमंजनान्वितम् ३ साश्चर्यंचैवसोत्साहंपापालस्यादिवर्जनम् प्रदक्षिणासमायुक्तनमस्कारपुरःसरम् ४ नीरांजनसमायुक्तमतिप्रीतेनचेतसा यामेयामेमहाभागकुर्यादारार्तिकंमम ५ षड्विंशद्गुणसंयुक्तमेकादश्यांचजागरम् यःकरोतिनरोभक्त्यानपुनर्जायतेभुवि ६ यएवंकुरुतेभक्त्याधित्तशाठ्यविवर्जितः जागरंपरयाभक्त्यासलीनोजायतेमयि ७ दृष्टाःकलिभुजंगेनस्वपंतेयेदिनेमम कुर्वंतिजागरंनैवमायापाशार्दि-

मोहिताः ८ प्राप्नाप्येकादशीयेषांकलौजागरणंविना नेषिनष्टानसंदेहोयस्माज्जीवितमध्रुवं ९ उद्धृतंनेत्रयुग्मंचदत्वापि
स्तदयेपदम् कृतंयेनैवपश्यंतिपापिनोममजागरम् १० अभावेवाचकस्याथगीतंनृत्यंचकारयेत् वाचकेसतिदेवेशपु
राणंप्रथमंपठेत् ११ अश्वमेधसहस्रस्यवाजपेयशतस्यच पुण्यंकोटिगुणंपुत्रममजागरणेकृते १२ पितृपक्षेमातृ
पक्षेभार्यापक्षेचमानद कुलानुद्धरतेचैतान्ममजागरणेकृते १३ उपोषणादिनेविघ्नेप्रारब्धेजागरेसति विहायस्था
नंतचाहशापंदत्वाव्रजाम्यहम् १४ अविद्धवासरेयेमंप्रकुर्वंतिहिजागरम् तेषांमध्येप्रहृष्टःसन्नृत्यंवैप्रकरोम्य-
हम् १५ यावद्दिनानिकुरुतेजागरंममसन्निधौ युगायुतानितावंतिवसतेममवेश्मनि १६ नृगपापिंडदानेननो
र्थैषड्भिर्मरवैः पूर्वजामुक्तिमायांतियथैकादशिजागरात् १७ यःकुर्य्याज्जागरेपूजांकुरुमैममवासरे पुष्पेपुष्पे-
श्वमेधस्यफलमाप्नोतिमानवः १८ यःकुर्याद्दीपदानंचरात्रौजागरणेमम निमिषेनिमिषेपुत्रलभतेगोयुतंफलम्
१९ योदद्याज्जागरेपुत्रहविष्यान्नसमुद्भवम् नैवेद्यलभतेपुण्यंशालिशोलसमुद्भवम् २० पक्वान्नानिचयोदद्या
त्फलानिविविधानिच जागरेमेचनुर्वक्फलभतेगोशतंफलम् २१ कर्पूरेणचतांबूलंददातिममजागरे मद्भक्तोमत्स
सादेनसप्तद्वीपाधिपोभवेत् २२ जागरेममदेवेशयः कुर्यान्नृपुष्पमंडपम् सपुष्पकविमानेनक्रीडतेममसन्निधौ
२३ मेजागरेतुयोधूपंसकर्पूरंसगुग्गुलम् ददातिदहतेपापंजन्मलक्षसमुद्भवम् २४ स्नापयेज्जागरेयोमांदधि
क्षीरघृताम्बुकैः भोगानीहलभेत्सोवैश्रतेचपरमांगतिम् २५ दिव्याम्बराणियोदद्यात्फलानिविविधानिच सचिरंव-
सतेस्वर्गेतनुसंख्यासमानिवै २६ दद्यादाभरणंयोमेहेमजंरत्नसंभवम् सप्तकल्पानिवसतेसोत्संगेमक्षियोमम्
२७ घृतेनदीपकंयोमेगव्येनचविशेषतः ज्वालयेज्जागरेरात्रौनिमिषेगोयुतंफलम् २८ जागरेमेचनुर्वक्कर्पूर
णचदीपकम् योज्वालयेतनीराजंकपिलादानजंफलम् २९ यःपुनःकुरुतेदीपंगीतंनृत्यंचपूजनम् ततःक्रतुश

नैःपुण्यंव्रतैर्दानशतैरपि ३० स्वयंयःकुरुतेगीतंविलज्जोनृत्यतेयदि सलभेन्निमिषार्द्धेनकोटियज्ञकृतंफलम् ३१ नि-
वारयतियोगीत्वं नृत्यंजागरणेमम षष्टिसुगसहस्राणिपच्यतेरौरवादिषु ३२ नृत्यमानस्यमर्त्यस्ययेकेचिन्निकटेगताः
विमुक्ताधर्मराजेनमुक्तायांनिचतत्पदम् ३३ नृत्यमानस्यमर्त्यस्यउपहासंकरोतियः जागरेयांनिनिरयंयावद्दि-
व्यंचतुर्दश ३४ जागरेममयःकुर्याद्भक्त्यापुस्तकवाचनम् श्लोकसंख्यासुगान्येवसवसेन्ममसन्निधौ ३५ मद्
क्षिणाप्रदानेनयत्फलंकथितंबुधैः ननत्कोटिमखैःपुण्ययुगसंख्यैरवाप्यते ३६ दीपमालांममाग्रेवैयःकुर्या-
ज्जागरिष्यन् विमानकोटिसंयुक्तमाकल्पंवसतेदिवि ३७ ममबालचरित्राणिजागरेपठतेहियः युगकोटिसहस्राणि
श्वेतद्वीपेवसेन्नरः ३८ तस्माज्जागरणंकार्यपक्षयोःशुक्लकृष्णयोः योगीनरपठनेरात्रौममनामसहस्रकम् ३९
वेदोक्तानांपुराणानांजागरात्पुण्यमाप्नुयात् धेनुदानतुयःकुर्याज्जागरेममपुत्रक ४० लभतेनात्रसंदेहःसप्तद्वीपव-
तीफलम् सर्वेषामेवपुण्यानामहत्पुण्यमहीतले ४१ द्वादशीजागरंपुत्रप्रसिद्धंभुवनत्रये जागरंयेचकुर्वंतिकर्म-
णामनसागिरा ४२ ननेषांपुनरावृत्तिर्ममलोकात्कथंचन प्रोत्साहयित्वालोकान्यःकुरुतेजागरंनिशि ४३ ग्रामा
निचक्रवर्तित्वसत्यमेव्यात्दनंकृत समानिताःकृकुत्स्थेनरात्रौजागरकारिणः ४४ स्वशक्त्याचैवदानेनग्रामंराज्य
स्कदुर्लभम् येकेचिद्गायकाविप्रावाद्यकानर्तकाश्चये ४५ नर्तकीसहितायांतिममलोकेसनातने दुर्योनिषुगनैः
सर्वैः कृत्वाजागरणंमम ४६ संग्रामापृथिवीसत्यकार्मुकैर्मुनिसत्तम निष्कामामुक्तिमापन्नाःश्वपचाद्याश्चजा
गरात् ४७ विचेकोनास्तिवर्णानांममजागरकारिणाम् नकलौपावनध्यानंनकलौज्ञानंहरीजलं ४८ नकलौ
पावनंजाप्यमुत्तमैकजागरमम द्वादशीदिवसेप्राप्तेयेकुर्वंतिहिजागरम् ४९ तेधन्यास्तेकृतार्थावैकलिकालेन
संशयः माभूयान्मानुषेलोकेद्वादशीविमुखोनरः ५० अतीतानन्यागतान्यपिपानयेन्नरकेहिसः वरमेकोगुरौ

र्युक्तः किंजानैर्बहुभिः स्फुटैः ५१ द्वादशीजागरात्सर्वांस्तारयेद्योहिपूर्वजान् माहात्म्यंपठतेभक्त्यामयोक्तंजाग
रेद्भवम् ५२ द्वादशीसंभवपुत्रकुलानांतारयेच्छतम् अगम्यागमनेपापमभक्ष्यस्यापिभक्षणे ५३ पापंविल-
यमायातिकृतेजागरणेस्फुत अज्ञानाद्यत्कृतंपापंज्ञात्वायत्पातकंकृतम् ५४ सर्वंतन्नार्जितंपापमिहजन्मनियत्कृ
तं सिद्ध्यंतिसर्वकार्याणिमनसाचिंतितान्यपि ५५ द्वादश्यांवैचनुर्वक्त्रोजागरणेकृते द्वादशीजागरेणैवमु
क्तिंगच्छंतिमानवाः ५६ नतत्पुण्यंकुरुक्षेत्रेप्रयागेवसतांकलौ माहात्म्यंवसतांपुंसांयत्पुण्यंद्वादशीषुच ५७
नाश्वमेधसहस्रैस्तुनचतीर्थावगाहनात् यत्फलंप्राप्यतेपुत्र द्वादशीजागरेकृते ५८ पठेद्वाशृणुयाद्वापिमाहा-
त्म्यंद्वादशीभवम् सर्वपापविशुद्धात्मासलभेच्छाश्वतीगतिम् ५९ सर्वदुष्टाःसमात्तस्यसौम्यस्तस्यसदाग्रहाः
संततेर्विनियोगात्तुद्वादशीयस्यकारणम् ६० ममकीर्तिरुचिर्नित्यंनविपद्येतकर्हिचित् रणेराजकुलेचैवसर्वदा
विजयीभवेत् ६१ धर्मोपरिमतिर्नित्यंभक्तिर्मयिस्तुनिर्मला पातकंनैवलिप्येतद्वादशीभक्तितोनरम् ६२ प्रेतत्व
मेवतस्यास्तिकृतेजागरणेमम एकादशींविनातस्यपरलोकगतिर्नहि ६३ तस्मात्सर्वप्रयत्नेनकलौकार्यंहिम-
द्दिनम् ततःप्रभातेद्वादश्यांकार्योमत्स्योत्सवोबुधैः ६४ मार्गशीर्षेशुक्लपक्षेयथाविध्युपचारतः अथमार्गशि
रेमासिद्वादश्यांनियतात्मवान् ६५ कृत्वादेवार्चनंधीमान्नाग्निकार्यंयथाविधि शुचिवासाः प्रसन्नात्माहव्य
मन्नंसुसंस्कृतम् ६६ वर्जयेद्दंतकाष्ठंतुतत्तथाचाम्ययत्नतः स्पृष्ट्वाकाशानिसर्वाणिध्यात्वावैमांगदाधरम् ६७
शंखचक्रगदापाणिंकिरीटंपीनवाससम् प्रसन्नवदनांभोजंसर्वलक्षणलक्षितम् ६८ ध्यात्वापुनर्जलंहस्तेगृही
त्वाभानुमध्यगम् ध्यात्वार्घ्यंदापयेत्तत्रकरतोयेनमानवः ६९ एवमुच्चारयेद्वाचंतस्मिन्कालेचतुर्मुख एकादश्या-
निराहारःस्थित्वाहनिपरेत्यहम् ७० भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत एवमुक्त्वाननोरात्रौमममूर्तेश्चसन्नि

धौ ७१ जपेन्नारायणायेतिस्वयंतत्रविधानतः ततःप्रभातेविमलेनदींगत्वासमुद्रगाम् ७२ इतरंवानडागंवागृहे
वानियतात्मवान् आनीयमृत्तिकांशुद्धांमंत्रेणानेनमानवः ७३ वंदयेद्देवदेवेशंनदाशुद्धोभवेन्नरः धारणपोष-
णंतस्तोभूतानांदेविसर्वदा ७४ तेनसत्येनमेपापंयावन्मोचयसुव्रते ब्रह्मांडोदरतीर्थानिकरैःस्पृष्टानिदेवतैः
७५ तेनेमांमृत्तिकांस्पृक्षावरंप्रति त्वयोद्धृताम् त्वयिनित्यंरसाःसर्वेस्थितावरुणसर्वदा ७६ तेनमामृत्ति
कांपूतांकुरुष्वमाचिरम् एवंमृद्तथातोयंप्रसादात्मावआलभेत् ७७ निष्कृत्यशेषमृदयापिंडमालिप्य
वैजले तस्मिन्नरःसदासम्यग्वक्ष्यत्युपचारतः ७८ स्नात्वाचावश्यकंकृत्वापुनर्मंमगृहंव्रजेत् तत्राराध्यमहा
योगिन्देवंनारायणंहरिम् ७९ केशवायनमःपादौकटिंदामोदरायच जानुयुग्मंनृसिंहायउरःश्रीवत्सधारि
णे ८० कंठेकौस्तुभनाभायवक्षःश्रीपतयेतथा त्रैलोक्यविजयायेतिबाहुंसर्वात्मनेशिरः ८१ रथांगधारिणेव
क्त्रंकरायेतिचवारिज गंभीरायेतिचगदामंभोजंशांतमूर्तये ८२ एवमभ्यर्च्यदेवेशंदेवंनारायणंप्रभुम् पुनस्त-
स्याग्रतःकुंभांश्चतुरःस्थापयेद्बुधः ८३ जलपूर्णान्सुमाल्यांश्चसिनचंदनलेपितान् चूतपल्लवसंयुक्तान्सित
वस्त्रावगुंठितान् ८४ छादितौलाम्रपात्रैश्चनिरूपूर्णैःसकांचनैः चत्वारस्तसमुद्राश्चकलशाःसंप्रकीर्तिताः ८५
तेषामध्येशुभंपीठंस्थापयेद्वस्त्रगर्भितम् तस्मिन्सुवर्णरौप्यंवानाम्नंवानारवतया ८६ आलभेसर्वपात्राणां
पालाशंपात्रमिष्यते तोयपूर्णंचतत्कृत्वातस्मिन्पात्रेनतोन्यसेत् ८७ सौवर्णंमत्स्यरूपंच कृत्वादेवंजनार्दनं
देवदेवांगसंयुक्तंमुनिस्मृतिविभूषितम् ८८ तत्रानेकविधैर्भक्ष्यैःफलैःपुष्पैश्चशोभितम् गंधधूपैश्चवस्त्रैश्च
अर्चयित्वायथाविधि ८९ रसातलगतावेदायथादेवत्वयोद्धृताः मत्स्यरूपेणतन्मामवादुद्धरकेशव ९०
एवमुच्चार्यतस्याग्रेजागरंतत्रकारयेत् यथाविभवसारेणप्रभातेविमलेतथा ९१ चतुर्णांब्राह्मणानांचचतुरोदा

पयेद्वृद्धान् पूर्वंचबह्वृचेदद्याच्छांदोग्येदक्षिणां तथा ९२ यजुःशारवान्वितेदद्यात्पश्चिमंघटमुत्तमम् उत्तरं
कामनोदद्यादेषएवविधिःस्मृतः ९३ ऋग्वेदःप्रीयतांपूर्वेसामवेदस्तुदक्षिणे यजुर्वेदःपश्चिमतोत्थर्ववः
श्चोत्तरेणतु ९४ अनेनक्रमयोगेणप्रीयतामितिवाचयेत् मत्स्यरूपंतुसौवर्णंआचार्यायनिवेदयेत् ९५
गंधधूपैस्तथावस्त्रैस्तुसंपूज्यविधिवत्क्रमात् यास्त्विमंसरहस्यंचमंत्रेणैवोपपादयेत् ९६ विधानविधिवत्कृत्वादा-
ताकोटिगुणोत्तरे प्रतिपद्यगुरुंयस्तुमोहाद्विप्रतिपद्यते ९७ सकोटिजन्मनरकेपच्यतेपुरुषाधमः विधानस्यम
दानायोगुरुरित्युच्यतेबुधैः ९८ एवंदत्वाविधानेनह्यादशंमासमर्चयेत् विप्राणांभोजनंदद्याद्यथाशक्त्याचद
क्षिणाम् ९९ भुंजीतसहितोविप्रैर्वाग्यतःसंयतेंद्रियः अनेनविधिनायस्तु कुर्यान्मत्स्योत्सवंनरः १०० तस्यपु
ण्यफलंचाग्र्यंशृणुसत्यवतावर आयुश्चब्रह्मणातुल्यंलभेद्यदिमहाव्रतः १०१ तद्वैत्थस्यधर्मस्यफलंकथ्
यितुंभवेत यइमंश्रावयेद्भक्त्याह्यादशीकल्पमुत्तमं शृणोतिवासपापेभ्यस्सर्वेभ्यविमुच्यते १०२ इतिश्रीस्कंदपुराणे
माहेविष्णुचतुर्मुखसंवादेमत्स्योत्सवकथनंनामत्रयोदशोऽध्यायः १३ ॐ श्रीभगवानुवाच यत्त्वयावैकृताःप्र-
श्नाःपूर्वंब्रह्मविदांवर तान्वर्णयिष्येक्रमशोनिशामयसुनिश्चितम् १ सहोमासेचदेवोवैकीर्तियुक्तोहिकेशवः
तस्यपूजाचकर्तव्यायथापूर्वंप्रभाषिता २ ब्राह्मणंकेशवंकृत्वातत्पत्नींचैवकीर्तिते दंपतीविधिवत्पूज्यौवस्त्राभू-
रणधेनुभिः ३ दंपतीपूजितौवत्सपूजितोहनसंशयः तस्मादवश्यंसंपूज्यौदंपतीममपुष्टिदौ ४ दानंचविवि
धंकार्यंममपुष्टिकरंपरम् गोदानंभूमिदानंचस्वर्णदानंविशेषतः ५ वस्त्रदानंततःशय्यातथालंकरणानिच स
द्मदानंप्रकर्तव्यंममसंतोषकारकम् ६ सर्वेषामेवदानानांविशेषंचत्रिकस्मृतम् वस्त्रंधरातथाधेनुर्विद्यादानंत
थैवच ७ दत्तेदानत्रिकेवत्सभवेत्प्रीतिर्ममातुला तस्मान्नरैस्तुकर्तव्यंसहोमासेत्रिकंशुभम् ८ स्नानस्यचविधिं

सम्यक्पुरैवोक्तोमयानघ पूजास्नानंचदानंचविधिरेषनसंशयः १ मार्गशीर्षेसमग्रंतुएकभुक्तेनयःक्षिपेत् भो
जयेद्योहिजान्भक्त्यासमुच्येद्व्याधिकिल्बिषैः १० कृषिभागीबहुधनोबहुधान्यश्चजायते किमत्रबहुनोक्तेनशृ
णुगुह्यंपरंमम ११ हुनभुग्ब्राह्मणश्चैवचदनंममभानद ब्राह्मणाख्यंमुखंश्रेष्ठंनतथाहव्यवाहनः १२ ब्राह्मणा
ख्येमुखेपुत्रहुनंकोटिगुणंभवेत् अग्न्याख्यब्राह्मणाधीनस्त्वनंत्राब्राह्मणाःकिल १३ सशर्करसर्पियुतपायस
शशिसन्निभम् होतव्यंब्राह्मणमुखेममतुष्टिकरस्तन १४ शुभमंडकमोदककोकरसंयुतफेनकयाघृतपूरघुत
म् यजविप्रमुखेममतुष्टिकरंयदिइच्छसिदारुनादिस्करवम् १५ कुमुदेनसमप्रभसौख्यदशुभ्रभक्तयुक्तमथ-
मुद्गयुतम् स्करभीरुतपुष्कलसर्पिसमंकुरुविप्रमुखेहवनंहिसहे १६ पयसासहसर्पिषाक्वथितंबहुकारिकचा
कुरुफलैःसितया सहहीरकरंफलनागरयासुतशारकस्तनशुभ्रकरम् १७ व्यंजनानिचशुभ्राणिमनोज्ञानिनिमि
त्ताणिच कर्तव्यानिसहोमासेब्राह्मणार्थंचतुर्मुख १८ प्रियस्यकरणंकार्यमन्यत्तेषांप्रियंचयत् कृत्वैवभोज-
येद्विप्रान्श्रद्धयापरयास्तन १९ रसस्याद्यन्नपूर्वंहिभुंजनेवैयथायथा तथातथाममप्रीतिर्जायतेचस्कदुर्लभा
२० तस्माज्ज्ञात्वातथाकार्यंयथानुष्यंतिब्राह्मणाः तुष्टैस्तैश्चाप्यहंतुष्टोभवामीहनसंशयः २१ श्रद्धस्त्वंचतु
र्वक्त्रनतेमिथ्याब्रवीम्यहम् एतद्धृत्यंमयाप्रोक्तंश्रेयोर्थंनवमानद २२ आक्रोशयंतियदिनेश्चथवाप्रहरंतिचेत्
तथापितेनमस्यावैममप्रीत्याहमानद २३ एवंकार्यंसदापुत्रमार्गशीर्षेविशेषतः यदुक्तंभवताब्रह्मन्भोक्तव्यंकिं
शृणुष्वतत् २४ भोक्तव्यंममचोच्छिष्टंममभक्तिपरायणैः पवित्रकरणंपुत्रपापिनामपिमुक्तिदम् २५ ममाशनरय
शेषंचयोभुनक्तिदिनेदिने शिक्थेशिक्थेभवेत्सुख्यंचांद्रायणशतोद्भवम् २६ अवशिष्टयथोच्छिष्टभक्तानांभोज-
नद्वयम् नान्यद्वैभोजनंतेषांभुक्त्वाचांद्रायणंचरेत् २७ अनर्पयित्वायोभुंक्तेअन्नपानादिकंचयत् श्वानविष्ठास

मंचान्नंपानंचमदिरासमम् २८ तस्मान्ममार्पयेत्पुत्रअन्नपानादिचौषधम् भक्षयेत्परयाभक्त्याअशुचेः शुचिकार
णम् २९ तीर्थयत्नादिकफलंकलिदोषविनाशनम् ममोच्छिष्टंसुगतिदमपिदुष्कृतकर्मणाम् ३० अन्येषांदेवता-
नांचनगृण्हीयाच्चभक्षितम् अभक्तानांचपक्कान्नंभुक्त्वाचनरकंव्रजेत् ३१ वक्तव्यमेवयत्प्रोक्तंतच्छृणुष्वसमाहितः
कथयिष्येनवक्त्रीत्याअपिगुह्यतरंमम ३२ ममनामप्रवक्तव्यंसहचैवविशेषतः कृष्णकृष्णेतिवक्तव्यंममभी
तिकरंपरम् ३३ प्रतिज्ञैषाचमेपुत्रवजानंतिसुरासुराः मनसाकर्मणावाचायोमेशरणमागतः ३४ सर्वोत्कृष्ट
चवैकुंठमस्थियांकमलामपि कृष्णकृष्णेतिकृष्णेतियोमांस्मरतिनित्यशः ३५ जलंभित्वायथापद्मंनरकादुद्ध
राम्यहम् ३६ विनोदेनापिदुर्भेनमौढ्याल्लोभाच्छलादपि योमांभजतिसोवश्यंमद्भक्तोनावसीदति ३७ यैर्वै
पठंतिकृष्णेतिमरणेपर्युपस्थिते यदिपापयुताः पुत्रनपश्यंतियमंक्वचित् ३८ पूर्वंवयसिपापानिकृतान्यपि
चकृत्स्नशः अंतकालेचकृष्णेतिस्मृत्वामामेत्यसंशयः ३९ नमः कृष्णायमहतेविवशोपिवदेद्यदि मुक्तपद
मवाप्नोतिमरणेपर्युपस्थिते ४० श्रीकृष्णेतिकृतोच्चारःप्राणैर्यदिवियुज्यते दूरस्थःपश्यतिचतंस्वगंतंप्रेत
नायकः ४१ स्मशानेयदिरण्यांकृष्णकृष्णेतिजल्पति म्रियतेयदिवेत्पुत्रमामेवैनिनसंशयः ४२ दर्श-
नान्ममभक्तानामृत्युमाप्नोतियःक्वचित् विनामत्स्मरणात्पुत्रमुक्तिमेतिसमानवः ४३ पापानलस्यदीप्तस्य-
भयमाकुरुपुत्रक श्रीकृष्णनाममेघोत्थैःसिच्यसेनीरबिंदुभिः ४४ कलिकालभुजंगस्यतीक्ष्णदंष्ट्रस्यकिं
भयम् श्रीकृष्णनामदावाग्निदग्धःसनश्यति ४५ पापपावकदग्धानांकर्मचेष्टावियोगिनाम् भेषजं
नास्तिमर्त्यानांश्रीकृष्णस्मरणंविना ४६ मृत्युकालेऽपिमर्त्यानांपापिनांदग्धुमिच्छताम् पापिनांनास्तिपाथे
यंश्रीकृष्ण स्मरणंविना ४७ तत्रपुत्रगयाकाशीपुष्करकुरुजांगलम् प्रत्यहंमदिरेयस्यकृष्णकृष्णेतिकीर्तो

नम् ४८ जीवितंजन्मसाफल्यंमुरवैतस्यैवसार्थकम् सततंरसनायस्यकृष्णकृष्णेतिजल्पति ४९ स
रुद्दुच्चरितंयेनहरिरित्यक्षरद्वयम् बद्धःपरिकरस्तेनमोक्षायगमनंप्रति ५० नाम्नोस्ययावतीशक्तिःपापनिर्दह
नेमम तावत्कर्तुनशक्नोतिपातकंपातकीजनः ५१ नापविद्धंभवेत्तस्यशरीरंनैवमानसम् नपापंनचवैक्ल
व्यंकृष्णकृष्णेतिकीर्तनात् ५२ श्रीकृष्णेतिवचःपथ्यंनपठेद्यःकलौनरः पापमेवैवनभवेत्कलौतस्यैवमान
से ५३ श्रीकृष्णेतिमज्जल्पंतंदक्षिणाशापतिर्नरम् श्रुत्वापमार्जतेपापंतस्यजन्मशतार्जितम् ५४ चांद्राय
णशतैःपापंपराकाणांसहस्रकैः यन्नोपयातिनद्यानिकृष्णकृष्णेतिकीर्तनात् ५५ नामभिर्नामकोटी
स्तोषोममभवेत्कचित् श्रीकृष्णेतिकृतोच्चारःप्रीतिरेषाधिकाधिका ५६ चंद्रसूर्योपरागैस्तुकोटियत्नफ
लंस्मृतम् तत्फलंसमवाप्नोतिकृष्णकृष्णेतिकीर्तनात् ५७ गुरुदाराभिगमनंहेमस्तेयाधिपातकम् श्रीकृ
ष्णकीर्तनाद्यांतिघर्मतप्तांहिमंयथा ५८ युक्तोयदिमहापापैःपेयादिगमनादिभिः मुच्यतेचांतकालेपिसकृ
त्श्रीकृष्णकीर्तने ५९ आविशद्भूमनायस्कंविनाप्याचारवर्तनात् प्रेतत्वंसोपिनाप्नोतिश्रुतेश्रीकृष्णकीर्तना
त् ६० मूकाभवंतिसाजिह्वासनीयातुरसातलम् नसाचेत्कलिकालेयाश्रीकृष्णगुणवादिनी ६१ स्वचक्रं
परचक्रंयाचद्याजिह्वाप्रयत्नतः कुरुतेयाकलौपुंत्रश्रीकृष्णगुणकीर्तनम् ६२ पापवल्लीमुरवैतस्यजिह्वारूपे
णकीर्त्यते यानवक्तिदिवारात्रौश्रीकृष्णगुणकीर्तनम् ६३ पतिताशनरवंडतुसाजिह्वारोगरूपिणी श्रीकृष्ण
कृष्णकृष्णेतिश्रीकृष्णेतिनजल्पति ६४ श्रीकृष्णनाममाहात्म्यंप्रातरुत्थायःपठेत् तस्याहश्रेयसांदाना
भवाम्येतन्नसंशयः ६५ श्रीकृष्णनाममाहात्म्यंत्रिसंध्यंहिपठेत्तुयः सर्वान्कामानवाप्नोतिसमृतःपरमांगतिं
६६ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येश्रीविष्णुचतुर्मुखसंवादेश्रीकृष्णनामवर्णननामचतुर्दशोऽ

२०

ध्यायः १५ ७ श्रीभगवानुवाच शृणुध्यानंचतुर्वक्त्रवक्ष्यामिप्रीतिमांस्तव श्रुतेनैवचसौभाग्यं
लभतेमानवोभुवि १ अथश्रीमद्वृन्दावनसंवीतहैमस्थलोद्भासिरत्नस्फुरन्मुडपांतः लसत्कल्पवृक्षाद्युडडीप्य-
रत्नस्थलाधिष्ठितांभोजपीठाधिरूढम् २ महानीलनीलाभमत्यंतबालगुडस्निग्धवस्त्रातविध्वस्तकेशम् श्लि
ष्टातपर्याकुलोत्फुल्लपद्मप्रमुग्धाननश्रीमदिंदीवराक्षम् ३ चलत्कुंडलोल्लासितंफुल्लगंडस्फुरत्सत्कपोलाधरंसु
स्मितास्यम् अनेकोल्लसत्कंठभूषालसत्बहुननरत्नपौंडरीकस्फुरन्नेत्रम् ४ समुद्यत्सरोरस्थलधेनुधूल्याक्तपुष्टां
गमष्टापदाकल्पदीप्तम् करीरस्थलोच्चारुजंघोरुयुग्मेपिनद्धे क्वणत्किंकिणीजालदीप्त्या ५ हसत्तलसद्बुजीव
प्रसूनप्रभापाणिपादांबुजोदारकांत्या करेदक्षिणेपायसंवामहस्तेदधाननवरुद्धहैय्यंगवीनम् ६ महाभार
भूतामरारातिसूथाननःपूतनादीभिहंतुंप्रवृत्तम् प्रभुंगोपिकागोपवृंदेनवीनंकरेद्वादिभिर्वेदितंदेवदेवम् ७
प्रभुंपूजयित्वात्यनुस्मृत्यकृष्णंभुजंगेंद्रवज्यादिभिर्भक्तिनम्राः सिनांभोजहैय्यंगवीनेक्षुदुग्धाविमिश्रेणदौग्धेन
सपीणयेत्तम् ८ इतिमानरेवार्चयेदच्युतंयोनरःप्रत्यहंश्चोदास्तिक्ययुक्तः लभेत्सोचिरेणैवलक्ष्मीसमग्रामि
हप्रेत्यशक्रंपरंधामभूयात् ९ मंत्रेश्वोक्तःपुरापुत्रभ्यादौलोकमनोहरः अथोग्याधनदानव्योमत्रराजस्त्यया-
कृत १० यत्नेनगोपनीयंचरहस्यंशीघ्रसिद्धिदम् ११ अलसमलिनाक्लिष्टंदंभमोहसमन्वितम् दरिद्ररोगिणंक्रु
द्धरोगिणंभोगलालसम् १२ असूयामत्सरग्रस्तंराठंपरुषवादिनम् अन्यायेनापिबहुलंपिशुनंदुष्टमानसम्
१३ बद्धाशिनंक्रूरचेष्टमग्रण्यंचदुरात्मनाम् कृपणंपापिनंरौद्रमाश्रितानांभयंकरम् १४ एवमादिगुणैर्युक्तं
शिष्यंनैवपरिग्रहेत् गृह्णीयाद्यदितद्दोषः प्रायोगुरुमुपस्पृशेत् १५ आमात्यदोषोराजानंजायादोषःपतियथा
तथाशिष्यकृतोदोषोगुरुमाप्नोत्यसंशयम् १६ तस्माच्छिष्यंगुरुर्नित्यंपरीक्ष्यैवपरिग्रहेत् कायेनमनसावा

चागुरुश्रूषणेरतम् १७ अस्यैववृत्तिमाश्रित्ययुक्तंमोक्षकृतोद्यमम् ब्रह्मचर्यरतंनित्यंदृढव्रतमकल्मषम् १८ प्रसन्नहृदयंशुद्धमशठंविमलाशयम् परोपकारनिरतंपरार्थविगतस्पृहम् १९ स्वचित्तवित्तदेहैस्तुपरितोषकरंगुरोः आश्रितानांतथापुत्रपरितोषकरंशुचिम् २० ईदृग्विधायशिष्यायमंत्रंदद्यात्तुनान्यथा यद्यन्यथावदेत्तस्मिन्देवताशापआपतेत् २१ शृणुपुत्रप्रवक्ष्यामिगुरोरपिचलक्षणम् एभिस्तुलक्षणैर्युक्तोगुरुरेवभवेन्नृणाम् २२ ममचेताःप्रसन्नात्माविमन्युश्चस्तुल्यनिंदनः साधुर्महान्सदालोकेसगुरुःपरिकीर्तितः २३ ममत्वनकरोनित्यंवैष्णवानांस्तुसंमतः मदाश्रयकथासक्तोममोत्सवरतःसदा २४ कृपासिंधुःस्तुपरार्थःसर्वसत्योपकारकः निस्पृहःसर्वतःसिद्धः सर्वविद्याविशारदः २५ सर्वसंशयसच्छेत्तानलसोगुरुरीदृशः ब्राह्मणःसर्वकालज्ञोकुर्यात्सर्वेषुनुग्रहम् २६ पूर्वोक्तलक्षणैर्युक्तःशिष्यईदृग्विधोगुरोः गृण्हीयात्सुव्रतन्मंत्रंमार्गशीर्षमदायने २७ वैष्णवानांव्रतानांचकुर्यात्स्वीकरणंबुधः मत्प्रियंशृणुयाच्छश्वच्छ्रीमद्भागवतंपरं २८ श्रीमद्भागवतंनामपुराणंलोकविश्रुतम् शृणुयाच्छ्रद्धयायुक्तोमनःसंतोषकारणम् २९ नित्यंभागवतंयस्तुपुराणंपठतेनरः प्रतिअक्षरंभवेत्तस्यकपिलादानजंफलम् ३० श्लोकार्द्धंश्लोकपादंवानित्यंभागवतोद्भवम् पठतःशृण्वतश्चस्तुगोसहस्रफलंलभेत् ३१ यःपठेत्प्रयतोनित्यंश्लोकभागवतंसकृत् अष्टादशपुराणानांफलमाप्नोतिमानवः ३२ नित्यंममकथायत्रतत्रनिष्ठतिवैष्णवाः कलिवास्यानरास्तेवैयेचयंतिसदाहिमाम् ३३ वैष्णवानांगृहेशास्त्राण्येचयंतिगृहेनराः सर्वपापविनिर्मुक्ताभवंतिस्करवंदिनाः ३४ येचयंतिगृहेनित्यं शास्त्रंभागवतंकलौ आस्फोटयंतिविघ्नानितेषांप्रीतोभवाम्यहम् ३५ यावद्दिनानिहेपुत्रशास्त्रंभागवतंगृहे तावत्पितरनिपितरः क्षीरसर्पिर्मधूदकम् ३६ यच्छंतिवैष्णवेभक्त्याशास्त्रंभागवतंहृदि कल्पकोटिसहस्राणां

णिममलोकेश संनिते ३७ येर्चयंनिसदागेहेशास्त्रंभागवतंनराः प्रीणितास्तेश्वविबुधायावदाभूतसंप्लवम्
३८ श्लोकार्धंश्लोकपादवावरंभागवतंगृहे शतशोथसहस्रैश्वकिमन्यैः शास्त्रसंग्रहैः ३९ नयस्यतिष्ठतेशास्त्र
गृहेभागवतकलौ नतस्यपुनरावृत्तिर्यास्यपाशात्कदाचन ४० कथसवैष्णवोज्ञेयः शास्त्रंभागवतंकलौ गृहेनति
ष्ठतेयेषाश्वपचादधिकाहिने ४१ सर्वस्वेनापिलोकेशकर्तव्यः शास्त्रसंग्रहः वैष्णवैस्तुसदाभक्त्यानुष्ठ्यर्थंमम
पुत्रक ४२ यत्रयत्रभवेत्पुण्यंशास्त्रंभागवतंकलौ तत्रतत्रसदैवाहंभवामिभिद्दशैः सह ४३ तत्रसर्वाणितीर्था
निनदीनदसरांसिच यज्ञाःसप्तपुरीनित्यंपुण्याःसर्वेशिलोच्चयाः ४४ श्रोतव्यंममशास्त्रंहियशोधर्मजयार्थि
ना पापक्षयार्थंलोकेशमोक्षार्थंधर्मबुद्धिना ४५ श्रीमद्भागवतंपुण्यमायुरारोग्यपुष्टिदम् पठतःशृण्वतो
वापिसर्वपापैःप्रमुच्यते ४६ नशृण्वंतिनरद्वयंतिश्रीमद्भागवतंपरम् सत्यंसत्यंहिलोकेशतेषांस्वामीसदायः
मः ४७ नगच्छंतियदामर्त्याःश्रोतुंभागवतंस्कन्द एकादश्यांविशेषेणनास्तिपापतरस्ततः ४८ श्लोकंभाग
वतंचापिश्लोकार्द्धंपादमेवचा लिखितंतिष्ठतेयस्यगृहेतस्यवसाम्यहम् ४९ सर्वाण्यमाभिगमनंसर्वतीर्था
वगाहनम् नान्यथापावनंनृणांश्रीमद्भागवतंयथा ५० यत्रयत्रचतुर्वक्त्रश्रीमद्भागवतंभवेत् गच्छामितत्रत
त्राहंगौर्यथास्कन्दवर्त्मला ५१ मत्कथावाचकंनित्यंमत्कथाश्रवणोत्सुकम् मत्कथाप्रीतिमनसंनाहंत्यक्ष्यामिन
न्नरम् ५२ श्रीमद्भागवतपुण्यंदृष्ट्वानोत्तिष्ठतेहियः संवत्सरंतस्यपुण्यंविलयंयातिपुत्रक ५३ श्रीमद्भागवतद
ष्ट्वाप्रत्युत्थानाभिवादनैः सन्मानयेतंदृष्ट्वाभवेत्प्रीतिर्ममातुला ५४ दृष्ट्वाभागवतंदूरात्प्रक्रमेत्संमुखंहियः
पदेपदेश्वमेधस्यफलमाप्नोत्यसंशयम् ५५ उत्थायप्रणमेद्योवैश्रीमद्भागवतंनरः धनंपुत्रांस्तथादारान्भक्तिंच
प्रददाम्यहम् ५६ महाराजोपचारैस्तुश्रीमद्भागवतंस्कन्द शृण्वंतियेनराभक्त्यातेषांवश्योभवाम्यहम् ५७

ममोत्सवेषुसर्वेषुभ्रादौभागवतंपरम् समर्चयंतिभक्त्यायेममाभेदेनस्कव्रत ५८ वस्त्रालंकरणैःपुष्पैर्धूपदी
पोपहारकैः वशीकृतोदृढंवत्ससस्त्रियःसत्पतिर्यथा ५९ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येश्रीविष्णु
चतुर्मुखसंवादेपंचदशोऽध्यायः १५ ॐ ब्रह्मोवाच कस्मिन्तीर्थेहिदेवेशमार्गशीर्षोऽधिकः
स्मृतः किंफलंचभवेत्तस्मिन्नेतत्सर्वंवदस्वभो १ श्रीभगवानुवाच. मथुरेतिस्फुरिव्यात मस्तिक्षेत्रं
परंमम स्फुरम्याचप्रशस्ताचजन्मभूमिःप्रियामम २ पदेपदेतीर्थफलंमथुरायांचतुर्मुख यन्नत्यनरः
तोमुच्यतेघोरकिल्बिषात् ३ सर्वधर्मविहीनापुरुषाणांदुरात्मनाम् नरकार्तिहरापुत्रमथुरापापनाशिनी
४ कृतघ्नश्चस्करापध्वचौरोभग्नव्रतस्तथा मथुरांप्राप्यमनुजोमुच्यतेघोरपातकात् ५ सूर्योदयेतमोनश्ये
द्यथाकज्जभयान्नगाः नाक्ष्यंदृष्ट्वायथासर्पामेघावातहतायथा ६ तत्वज्ञानाद्यथादुःखंहरिदृष्ट्वायथागजाः
तथापापानिनश्यंतिमथुरादर्शनात्सकृत ७ श्रद्धयाभक्तियुक्तस्तुदृष्ट्वामधुपुरीनरः ब्रह्महापिविशुद्ध्येत किंपु
नस्त्वन्यपातकी ८ मथुरांस्नातुकामस्यगच्छतस्तुपदेपदे निराशानिपतंत्यघपापानिचशरीरतः ९ अनुषंग
णगच्छंतिवाणिज्येनापिसेवया मथुरास्नानमात्रेणपापंपत्यक्कादिवंव्रजेत् १० नामापिगृण्हतामस्यसदैवत्वं
नसंशयः सदाकृतयुगंतत्रसदात्रैवोत्तरायणम् ११ यःशृणोतिचतुर्वक्त्रमाथुरंमममंदिरम् अन्येनोच्चरितं
नैवसोपिपापात्प्रमुच्यते १२ त्रिरात्रमपियेतत्रवसंतिमनुजाःसकृत तेषापुनंतिसंदृष्ट्वास्पृष्ट्वाश्चरणरेणवः १३
यथातृणसमूहंतुज्वालयन्निस्फुलिंगकाः तथामहांतिपापानिदहतेमथुरापुरी १४ स्नानेनसर्वतीर्थानां
यत्स्यात्सकृत्संचयः ततोधिकतरप्रोक्तामथुरासर्वमंडले १५ चतुर्णामपिवेदानांपुण्यमध्ययनाच्चयत्
तत्पुण्यंजायतेतत्रमथुरास्मरतांनृणाम् १६ अन्यत्रहिकृतंपापंतीर्थमासाद्यनश्यति तीर्थेषुयत्कृतंपापं

वज्रलेपोभविष्यति १७ मथुरायांकृतंपापंमथुरायांप्रणश्यति धर्मार्थकाममोक्षाख्यंस्थित्वातत्रलभेन्नरः १८
अन्यत्रदशभिर्वर्षैः प्रारब्धंभुज्यतेहियत् किल्बिषंचचतुर्वक्त्रमथुरेदशभिर्दिनैः १९ दिविनैवनपातालेनांतरिक्षेन-
मानुषे समंतुमथुरायांहिप्रियंममसदैवहि २० सर्वेषामेवतीर्थानांमाथुरंपरमंमहत् बालक्रीडनरूपाणिकृता
निसहगोपकैः २१ त्रिंशद्वर्षसहस्राणित्रिंशद्वर्षशतानिच यत्फलंभारतेवर्षेतत्फलंमथुरांस्मरन् २२ सन्नि-
हत्यांतुयत्पुण्यंराहुग्रस्तेदिवाकरे ततोधिकंलभेत्पुत्रमथुरायांदिनेदिने २३ पूर्णेवर्षसहस्रेनुतीर्थराजेनुयत्फ
लम् तत्फललभतेपुत्रमथुरायांसहोदिने २४ पूर्णेवर्षसहस्रेनुवाराणस्यांचयत्फलम् तत्फललभतेपुत्रम-
थुरायांसहोदिने २५ गोदावरीह्यारकयोर्नरोयः क्षेत्रेगुरूणांक्षितिदारकेयः षण्मासकान्साधयतेगयायांसमं-
भवेन्नोदिनमेकमाथुरम् २६ नद्वारकाकाशिगयानमायागदाधरोयस्यसमंनतीर्थम् संनर्पितायद्यमुनाजलेन
वांछंतिनोवैपितृपिंडदानम् २७ मथुरायांप्रकुर्वंतिपुरीसाधारणेदृशम् येनरास्तेपिविज्ञेयाःपापराशिभिर्
न्विताः २८ नद्दृशामथुरायेनदिदृक्षायस्यजायते यत्रतत्रमृतस्यापिमथुराजन्मजायते २९ भूमेरजांसिगणये
त्कालेनापिचनुर्मुरव मथुराजानितीर्थानितेषांसंख्यानविद्यते ३० कुरुभोकुरुभोवासंमथुराख्यापुरींप्रति वसा
मिसतनंतस्यांगोपकन्याभिरावृतः ३१ रेरेसंसारमग्नाद्यशिक्षामेकाननःशृणु यदीच्छसिस्करंसाद्रंवासंकुर्या-
श्चनांपुरीम् ३२ अहोलोकोमहानंधोनेत्रयुक्तोनपश्यति माथुरेविद्यमानेपिसंसृतिंभजतेसदा ३३ मानुषींयो
निमतुलांलब्ध्वाभाग्यस्ययोग्यता वृथैवायुर्गतंतेषांनदृष्टामथुरापुरी ३४ अहोमनेःस्फटोर्बल्यमहोभाग्यविदोवि
दम् अहोमोहस्यमहिमामथुरानैवसेव्यते ३५ मथुरांतुपरित्यज्ययोन्यत्रकुरुतेमतिम् मूढोभ्रमतिसंसारेमोहि
तोममममायया ३६ मथुरामपिसंप्राप्ययोन्यत्रकुरुतेस्पृहाम् दुर्बुद्धेस्तस्यकिंज्ञानंसोऽज्ञानेनविजृंभितः ३७ मा

मापित्रापरित्यक्तायेत्यक्तानिजबंधुभिः येषांकापिगतिर्नास्तिनेषांममपुरीगतिः ३८ पापराशिभराक्रांतायेदारि
द्र्यपराजिताः येषांकापिगतिर्नास्तिनेषांममपुरीगतिः ३९ सारात्सारतरंस्थानंगत्वाद्भुत्यूत्तरंपरम् गतिमन्वेषमा
णानांमथुरापरमागतिः ४० नतत्पुण्यैर्नतद्दानैर्नतपोभिर्नतुत्सवैः नलभ्यंविविधैर्योगैर्लभ्यंमद्दतुभावनः ४१
मयियेषांस्थिराभक्तिर्भूयसीयेषुमत्कृपा तेषामेवहिधन्यानांमथुरायांभवेद्गतिः ४२ यैर्योगैर्योगयुक्तस्यब्र-
ह्मज्ञस्यमनीषिणः सागतिस्त्यजतःप्राणान्मथुरायांनरस्यच ४३ काश्यादिपुर्योयदिसंतिलोकेतासांतुमध्ये
मथुरैवधन्या याजन्ममौंजीव्रतमुक्तिदानैर्नृणांचतुर्धाविदधातिमुक्तिम् ४४ नयोगैर्यागतिर्लभ्यामन्वंतरशतै-
रपि अन्यत्रहेलयामात्रलभतेयत्प्रसादतः ४५ नपापेभ्योभयंयत्रनभयंयत्रवैयमात् नगर्भवासभीर्यत्रनक्षु
त्रंकोनसंश्रयेत् ४६ मथुरायांचयत्पुण्यंतत्स्यपुण्यफलंशृणु मथुरायांसमासाद्यमथुरायांमृताहिये ४७ अ-
पिकीटपतंगाद्याजायंतेनेचतुर्भुजाः कूलास्तंतियेदृक्षास्तेपियांतिपरांगतिम् मूकाजडांधबधिरास्तेयानिय
मवर्जिताः ४८ कलौनैवमृतायेचममलोकंव्रजंतिते सर्पदष्टाःपरुहृताःपावकांबुविनाशिताः ४९ लब्ध्वाश्व
मृत्यवोयैस्तुमाथुरेममलोकगाः सत्यंसत्यमुनिश्रेष्ठब्रुवेशपृथपूर्वकम् ५० सर्वाभीष्टप्रदंनान्यमथुरायाःसमद्यः
चित् त्रिवर्गदाकामिनांयामुमुक्षूणांचमुक्तिदा ५१ भक्तिस्थाभक्तिदांकस्तांमथुरांनाश्रयेद्बुधः एतादृशीमधुपु
रीकर्तव्यामार्गशीर्षके ५२ तस्याभावेपुष्करंहिकर्तव्यंविधिपूर्वकम् ज्येष्ठंहिब्रह्मणःकुंडंमध्यंकुंडंचवैष्णवं
५३ कनिष्ठंरुद्रदैवत्यमितिजानीहिबुद्धिमन् एषुस्नानंचदानंचश्राद्धंचविधिपूर्वकम् ५४ पूजाचमहतीका
र्यामममप्रीतिकरास्कृत पूर्णायानुभवेत्पुत्रसहोमासेषुपुत्रक ५५ धरादानंचकर्तव्यंपूर्णायांविधिपूर्वकम्
सहोमासेहिपूर्णायांसमदानंचकारयेत् ५६ ब्रह्मभोज्यंहिकर्तव्ययथाविभवसारतः पूर्णायामेवकर्तव्यउत्से

वोन्नतपूर्तये ५७ यादृशीमथुरापुत्रसहोमासेममप्रिया ननयानीर्यराजाघातद्भावेचपुष्करम् ५८ पुष्करेमथु
रायांवेपूर्णाकार्याविचक्षणैः यत्रकुत्रापिवाकार्याविधियुक्ताचपूर्णिमा ५९ स्नानदानतथापूजापूर्णायानकरोति
: षष्ठिवर्षसहस्राणिपच्यतेरौरवादिषु ६० तस्मात्सर्वप्रयत्नेनमान्यापूर्णाविचक्षणैः मार्गशीर्षेणसंयुक्तान्यून-
तफलदायिनी ६१ यद्यामेकथितंवत्समार्गशीर्षममप्रियम् करोतियोनरोभक्त्यानस्यपुण्यफलंशृणु ६२ तीर्थायु
तेषुयत्पुण्यंयत्पुण्यंव्रतकोटिभिः सर्वयज्ञेषुयत्पुण्यंतत्पुण्यंसमवाप्नुयात् ६३ अपुत्रोलभतेपुत्रंनिर्धनोधनमेव
च विद्यार्थीचनथाविद्यांरूपार्थीरूपमाप्नुयात् ६४ ब्राह्मणोब्रह्मवर्चस्वीक्षत्रियोविजयीभवेत् वैश्योनिधिप
तित्वंचशूद्रःशुद्ध्येनपातकात् ६५ यद्दुर्लभंचदुष्प्राप्यंत्रिपुलोकेषुमानद तत्सर्वंप्राप्नुयान्मर्त्यःसहोमासेनसंश
यः ६६ यद्यप्येतेषुकामेषुसक्तायेमानवाःसदा तुष्टात्मतेचनुर्वक्त्रकामार्होमहीभुज ६७ सदुर्लभाहिमद्भ-
क्तिर्ममवश्यकराशुभा सावैसंप्राप्यतेपुत्रसहोमासेकृतेनथा ६८ ममप्रीतिकरंमासंसर्वदाममवल्लभम् स-
र्वंसंप्राप्यतेसुभ्रान्मत्प्रसादाच्चतुर्मुख ६९ इतिश्रीस्कंदपुराणेमार्गशीर्षमाहात्म्येश्रीविष्णुचतुर्मुखसंवादे
षोडशोऽध्यायः १६ सर्वश्लोकसंख्या ८५६ इतिश्रीज्योतिर्वित्कुलावतंस्यंकटरामात्मजहरिकृष्णवि
निर्मितेबृहज्ज्योतिषार्णवेअष्टमेधर्मस्कंधेचतुर्थेमासस्तवकेमार्गशीर्षमाहात्म्यंनवमम् ९ श्रीरस्तु

यह मार्गशीर्षमाहात्म्य मुंबईमें ५० श्रीधरशिवलालके मज्ञायुक्तज्ञानसागर छापखानामें छाप्यो सं-१९४५ शा-१८१० स-१८८९

इतिमासस्तबकेमार्गशीर्षमाहात्म्यसमाप्त